उपक्रमप ।क्रमः ।

श्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्य
श्रीरङ्गराजाध्वरिवरसून्वप्पय्यदीक्षितविरचितः

वाराणसेय सेंट्रलहिन्दूकालेजसम्बन्धिरणधीरसंस्कृतपाठशालायां
श्रीगौरीशङ्करनाम्ना संस्थापितवेदांतशास्त्राध्यापनपदमल-
ङ्कुर्वाणेन द्राविड श्रीलक्ष्मणशास्त्रिणा परिशोधितः ।

यह पुस्तक व्रजभूषणदास और कम्पनी के
पुस्तकालय में मिलेगी ।

बनारस ।

Published
by
BRAJ B. DAS & CO.
BENARES.
VIDYÀVILAS PRESS.
1904.

॥ श्रीगुरुः शरणम् ॥

॥ उपक्रमपराक्रमस्य भूमिका ॥

इह खलु ऐहिकामुष्मिकार्थसाधनप्रकाशनसमर्थं वेदतत्त्वमेव सर्वैरास्तिकैः समाद्रियते। परं तदर्थतत्त्वं साधारण्येन सर्वैर्ज्ञातुमशक्यमिति विचारादिपुरस्सरमेव ज्ञातव्यं भवति सच विचारप्रकारः महर्षिभिर्जैमिन्यादिभिः पूर्वोत्तरमीमांसयोर्बाहुल्येन निरूपितः। तत्र सर्वेषां वाक्यानां तत्र तत्रार्थे तात्पर्यनिर्णयोपयोगिलिङ्गषट्कं निरूपितम् तथाचोक्तम्।

उपक्रमोपसंहारावभ्यासो ऽपूर्वता फलम्।
अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णय इति॥

अत्रोपक्रमोपसंहारपदाभ्यां तत्तद्विचार्यवाक्यीयाद्यन्तभागनिष्ठमेकार्थपर्यवसायित्वं लक्षणया बोध्यते। अभ्यासोनाम अनन्यपरं पुनः श्रवणं। अर्थवादश्च स्तुतिनिन्दान्यतरबोधकं वाक्यं। एतत्त्रयं शब्दघटितत्वाच्छब्दनिष्ठं लिङ्गमित्युच्यते। अपूर्वत्वं प्रकृतवाक्यात् प्रकृतार्थविषयकज्ञानोत्पादात्पूर्वं केनाऽपि प्रमाणान्तरेणाज्ञातत्वं। फलं प्रकृतवाक्यार्थविषयकज्ञानस्य फलवत्त्वम्। उपपत्तिश्च प्रमाणान्तरेण प्रकृतवाक्यार्थस्याबाधितत्वम्। एतत्त्रयन्तु अर्थनिष्ठम्। तत्रोपक्रमोपसंहारयोरेकार्थनिष्ठत्वस्यैकार्थतात्पर्यनिर्णायकत्वेन लिङ्गत्वमेकस्य वाक्यस्यानेकत्र तात्पर्यसंशये सति यस्मिन्नर्थे आद्यन्तभागयोः पर्यवसानं स एव तात्पर्यविषय इति निर्णयात् अन्यथा तस्य वैयर्थ्यं प्रसज्येत क्वचिच्चानुवादकत्वशङ्कापसारकतयाऽपि तस्य लिङ्गत्वं यदि हीदं वाक्यमेतमर्थमनुवदेद्वचर्थमेव स्यादित्यापत्तिसम्भवात्। अनन्यपरपुनःश्रवणरूपस्याभ्यासस्यादरज्ञापनद्वारा तात्पर्यलिङ्गत्वं तथाचोक्तं अभ्यासोहि भूयस्त्वमर्थस्य भवति यथाऽहो दर्शनीया अहो दर्शनीयेत्यादि। आदरश्च यद्यपि प्राशस्त्यरूपो ऽभ्यस्यमानस्यार्थस्य विधेयत्वानुमानद्वारा तात्पर्यविषयत्वं बोधयति अर्थवादोऽपि तथेति नानयोर्भेदसम्भवस्तथाऽपि अर्थवादज्ञाप्यं प्राशस्त्यं बलवदनिष्टाजनकत्वरूपमभ्यासबोध्यन्तु अर्थान्तरादुत्कृष्टत्वरूपमिति नाभ्यासार्थवादयोरैक्यम, अर्थवादस्यापि विधेयप्राशस्त्यनिषेध्यनिन्दाधीद्वारा विधिनिषेधवाक्याधीनज्ञानोत्पादसहकारितया ऽऽवश्यकत्वमितरथा प्रप्रवर्तनानिवर्तनारूपयोस्तदर्थयोस्तादृग्धीरूपेतिकर्तव्यतानन्वयात् शाब्दबोध एव न पर्यवस्येत् तत्र शब्दनिष्ठलिङ्गत्रयस्यापि अतिप्रसङ्गवा-

रकतया तात्पर्यालिङ्गत्वमेष्टव्यमन्यथा वेदान्तानामद्वितीये ब्रह्मणीव सत्यकामत्वादिविशिष्टेऽपि अबाधितत्वादिकं सम्भवति श्रुतिबोधितत्वेनाबाधितत्वस्योपासनाविषयत्वेन प्रयोजनवत्त्वस्य च सम्भवादतस्तत्राऽपि तात्पर्यं प्रसज्येतेत्यभ्यासादेरद्वितीय एव विद्यमानत्वेन तत्रैव तात्पर्यमिति निश्चीयत इत्येवं रीत्या तस्योपयोगः। अर्थनिष्ठलिङ्गत्रयस्य तु प्रामाण्यशरीरनिर्वाहकतया तात्पर्यं प्रति व्यापकतया लिङ्गत्वं यथा यज्ञोपवीतादिकं ब्राह्मण्यं प्रति, तत्राऽनुवादकवाक्यस्य स्वार्थे प्रामाण्यवारणायापूर्वत्वमभ्युपगतम्। उत्तानावै देवगवा वहन्तीत्यादिवाक्यस्य प्रामाण्यवारणाय फलवत्त्वमुपात्तम्। ग्रावाणः प्लवन्त इत्यादिवाक्यानां प्रामाण्यवारणायाबाधितत्वमप्युपात्तम्। न चोत्तानादिवाक्यस्य निष्प्रयोजनार्थपरत्वे तदध्ययने प्रवृत्त्यनुपपत्तेः स्वार्थे तात्पर्याभावेऽपि प्रामाण्यशरीरे प्रयोजनवत्त्वनिवेशो व्यर्थ इति चेन्न। यादृशं ज्ञानं प्रवृत्तिनिवृत्तिद्वारा साक्षाद्वा प्रमातुरिष्टप्रयोजकं तस्यैव प्रमात्वेन लोके व्यवहारेण निष्प्रयोजनस्या प्रमात्वात्। कदाचिन्निष्फलार्थे प्रत्यक्षादेः प्रामाण्यसम्भवेऽपि न श्रुतेस्तत्सम्भवः फलवदर्थज्ञानमुद्दिश्याध्ययनसंस्कृतश्रुतीनां विनियोगेन निष्फलार्थे तात्पर्याभावानिश्चयात् इत्येवं रीत्या सर्वेषामुपयोगित्वं वर्तते। तत्र लिङ्गषट्के उपक्रमोपसंहारयोः परस्परविरुद्धत्वे कतरदूबाध्यमित्याकाङ्क्षाया उदयात् तन्निवर्तकविचारस्य पूर्वोत्तरमीमांसयोः कुत्रचित्कृतत्वेऽपि अनतिविशदतया यथावद्बोधानौपयिकतामालक्ष्य पूर्वोक्तविचारप्रधानमेव शब्दसङ्क्षिप्तमर्थबहुलमुपक्रमपराक्रमं नाम ग्रन्थं जग्रन्थ चतुरधिकशतप्रबन्धनिर्माता श्रीमानप्पयदीक्षितवरः। तमिमं ग्रन्थं प्रकाशयितुं कृतमतिः श्रीयुतहरिदासगुप्तेन भूयोऽभ्यर्थितोऽहमतन्मुद्रणकार्ये प्रावर्तिषि शोधनकार्ये च विविधविद्याविलाससदनश्रेष्ठिश्रीयुतगोविन्ददासमहाशयस्यैकं नवीनं नातिशुद्धमपरंच श्रीमत्परमहंसपरिव्राजकपरिवृढश्रीमत्तारकाश्रमस्वामिप्रतिष्ठापितपुस्तकालयस्थं प्रायशः शुद्धं स्खले स्खले सन्दिग्धं इति पुस्तकद्वयसाहाय्यं सम्पाद्य स्वशक्त्यनुसारेण समापयम्। तदत्र मदीयमतिदोषात्सञ्जातानि स्खलितान्युपेक्ष्य गुणगृह्या विपश्चितो दृष्टिप्रसादेन समीकुर्युरित्याशासे इति शुभम्।

आश्विनशुक्ल ४ बुधवासरे
संवत् १९६१

जटापाठशुपनामको
लक्ष्मणशास्त्री द्राविडः

उपक्रमपराक्रमस्य विषयसूची ।

	पृष्ठाङ्काः ।
वेदोपक्रमाधिकरणकथनम्	२
अश्वप्रतिग्रहेष्ट्यधिकरणनिरूपम्	३
उपक्रमादुपसंहारप्राबल्यपूर्वपक्षः	५
पूर्वपक्षे ऽकार्याधिकरणप्रदर्शनम्	७
जातेष्ट्यधिकरणन्यायेनोपसंहारप्राबल्यसमर्थनम्	९
अपच्छेदन्यायेनोपसंहारप्राबल्यसमर्थननिरासः	११
उपक्रमप्राबल्येनैव वेदधर्मत्वसमर्थनम्	१३
उपक्रमप्राबल्येनैव दातुरिष्टिरिति निर्णयः	१५
अक्ताधिकरणाविरोधनिरासः	१९
वाक्यशेषाद्विशेषग्रहणनिर्णयः	२१
उपसंहारस्य नोपक्रमबाधकत्वम्	२३
अर्थवादेन विशेषावधारणव्युत्पादनम्	२५
अधिकशङ्कानिरासाय पुनर्विचारः	२७
अधिकरणान्तरैरुपसंहारप्राबल्यशङ्का	२९
ज्योतिष्टोमाधिकरणे उपक्रमानुरोधेनोपसंहारानुसरणम्	३१
आकाङ्क्षयैव विशेषपर्यवसानम्	३३
इयेनवाक्य उपसंहारप्राबल्यनिरासः	३५
वैश्वानरवाक्ये उपसंहारप्राबल्यनिराकरणम्	३७
अधिकरणान्तरेणोपसंहारप्राबल्यशङ्का	३९
अक्ताधिकरणन्यायादविरोधः	४१
उत्तरमीमांसायामपि उपसंहारप्राबल्यनिरासः	४३
बह्वनुग्रहन्यायेन दहराकाशो ब्रह्मेति निर्णयः	४५
रामानुजीयकल्पनानिरासः	४७
उपसंहारगतत्वेन लिङ्गस्य प्राबल्यशङ्का	४९
उपक्रमगतत्वेन लिङ्गस्य प्राबल्यमिति समाधानम्	५१
आकाशाधिकरणे नोपसंहारप्राबल्यमिति निर्णयः	५३
उपसंहारः	५४

॥ समाप्तमुपक्रमपराक्रमस्य विषयसूचीपत्रम् ॥

॥ उपक्रमपराक्रमः ॥

श्रीगणेशाय नमः ।

उपक्रमस्य प्रबलत्वमूचिरे ययोपसंहारविरोधिनो बुधाः ।
प्रतिष्ठितां तामिह तर्कसन्ततिं प्रबोधयामः प्रतिकूलजल्पितान् ॥१॥

मीमांसकास्तावदुपक्रमोपसंहारयोर्विरोधे सत्युपक्रमस्य प्राबल्ये न्यायमाहुः । सर्वस्यापि शब्दस्य स्वार्थलक्षणे विरोधः कारणम । स च प्रतियोगिनि दृष्टे ज्ञायते । न चोपक्रमदशायामुपसंहारो विरोधी ज्ञायत इत्युपक्रमो मुख्यवृत्तिरेव युक्तः । उपसंहारो मुख्यवृत्तिश्चेन्न तेन सम्बध्यते आकाङ्क्षावशेन हि सम्बन्धः । न च पूर्वं प्रतीतस्य स्वविरुद्धार्थे भवत्याकाङ्क्षा अत उपसंहारस्तदनुरोधेन बलाल्लक्षणादिकं प्रतिपद्यते । अत एव वेदोपक्रमाधिकरणेऽश्वप्रतिषेधेष्ट्याद्यधिकरणे चोपक्रमानुसारेणोपसंहारो नीतः । तद्यथा । तृतीयेऽध्याये चिन्तितम । * श्रुतेर्जाताधिकारः स्यात् * ज्योतिष्टोमे प्रजापतिर्वा इदमेक आसीत्स तपोऽतप्यत तस्मात्तपस्तेपानात्त्रयो देवा अजायन्ताग्निर्वायुरादित्यस्ते तपोऽतप्यन्त तेभ्यस्तपस्तेपानेभ्यस्त्रयो वेदा अजायन्त अग्नेर्ऋग्वेदो वायोर्यजुर्वेद आदित्यात्सामवेद इत्युपक्रम्य श्रूयते तस्मादुच्चैर्ऋचा क्रियते उपांशु यजुषा उच्चैः साम्नेति । तत्र संशयः । किमुच्चैष्ट्रादिविधावृगादिशब्दैस्तदभिधेयानां ग्रहणमुत वेदानामिति उपक्रमे वेदशब्दश्रवणादुपसंहारे ऋगादिशब्दश्रवणाच्च । वेदशब्दो हि मन्त्रब्राह्मणसमुदायात्मकस्य काठकादिग्रन्थविशेषस्य वाचकः * वेदानधीत्य वेदौ वा वेदं वाऽपि यथाक्रम * मित्यादिव्यवहारात । ऋग्यजुस्सामशब्दास्तु *तेषा मृग्यत्रार्थवशेन पादव्यवस्था । शेषे यजुः शब्दः । गीतिषु सामाख्या * इति सूत्रैः सपादबद्धापादबद्धमन्त्रविशेषवाचकत्वेन निर्णीता अतो वेदशब्दस्य ऋगादिशब्दानां च विभिन्नार्थकत्वाद्भवति संशयः उपक्रमोपसंहारयोर्विप्रतिपत्तेरेकवाक्यत्वाच्च उभयोरेकविषयत्वे अवश्यम्भाविनि किमुपसंहारविध्युद्देशवशात् उपक्रमस्थार्थवादगतवेदशब्दो वेदैकदेशऋगादिपरो भवतु, किं वोपक्रमगतार्थवादवशादुपसंहारस्थविध्युद्देश्यगतमृगादिपदमृगादिप्रायवेदपरं भवत्वि-

ति । पूर्वपक्षे यस्मादृगादयः प्रजापतिजातेभ्योऽन्यादिभ्यो जातास्तस्मात्प्रशस्तैस्तैरुच्चैष्ट्वादिनियतस्वरयुक्तैरेव कर्म कर्तव्यमिति कर्माङ्गभूतानामृगादीनां वेदविशेषानादरेण यत्किञ्चिद्वेदस्थानामुच्चैष्ट्वादिविधानम् । सिद्धान्ते तु यस्मादुक्तरूपेभ्योऽन्यादिभ्य ऋग्वेदादयो जातास्तस्माद्यदृग्वेदादिभिः क्रियते कर्मवृन्दं तस्य प्रशस्तस्योच्चैष्ट्वादि कर्तव्यमिति तत्तद्वेदविहितकर्मराशिगुणत्वेनोच्चैष्ट्वादिविधानमिति फलभेदः । नन्व विध्युद्देशस्य प्रधानत्वादप्राप्तविषयत्वेन * न विधौ परः शब्दार्थ* इति न्यायाच्च न तत्र लक्षणा किन्त्वर्थवादस्य गुणत्वादनुवादत्वेन लक्षणासहिष्णुत्वाच्च तत्रैव लक्षणा युक्तेति ऋगादिशब्दैः स्वाभिधेयानां ग्रहणमिति पूर्वः पक्षः । सिद्धान्तस्तु लब्धात्मनः प्रधानस्य गुणादबलीयस्त्वम् । विध्युद्देशास्त्वहर्गादिविषयत्वेनात्मानं न लभते । उपक्रमगते हि वेदशब्देऽसञ्जातप्रतिपक्षे यथाश्रुतार्थेऽवगते तदुपसंहारगतमुपजातप्रतिपक्षमृगादिपदं यथाश्रुतार्थं सत्तदेकवाक्यतां न प्रतिपद्यते । न हि सम्भवत्येवं स्तुतिविधानयोरन्वयः यस्मादेवमेते वेदा जातास्तस्मादृग्वेदादीनामुच्चैष्ट्वादिकर्तव्यमिति । तेनर्गादिशब्दलक्षणया तस्योच्चैर्ऋग्वेदेन क्रियत इत्यादिरूपेण तदनुगुणतयैवात्मलाभः । अतः प्रधानत्वेपि विध्युद्देशस्यार्थवादानुसारेणैव लब्धात्मकस्योपक्रमविरोध्यर्थोपस्थापकत्वाभावाच्च तदनुसारेण उपक्रमगतवेदशब्दस्यर्गादिलक्षणा कल्पनीया । नापि वेदस्तुतेरेव लक्षितलक्षणादिना तदवयवभूतर्गादिस्तुतौ पर्यवसानं कल्पनीयम् । अप्राप्तविषयत्वं त्वसिद्धम् । उपक्रमे वेदानां प्रस्तावेन वेदसंस्पर्शेन किञ्चिद्विधास्यत इत्यवगते किं तद्विधेयमित्येतावदनवगतमपेक्षितं च विध्युद्देशाद् गृह्यत इति विध्युद्देशस्थितानामप्यृगादिशब्दानामवगतावषयत्वात् तस्मात्तैर्लक्षणया वेदानां ग्रहणमिति ।

तथा तृतीय चिन्तितम् । * अचोदितकर्मभेदात् * प्रजापतिर्वरुणायाश्वमनयत्स स्वां देवतामार्छत्स पर्यदीर्यत स एतं वारुणं चतुष्कपालमपश्यत्तं निरवपत्ततो वै स वरुणपाशादमुच्यत वरुणो वा एतं गृह्णाति योऽश्वं प्रतिगृह्णाति यावतोऽश्वान्प्रतिगृह्णीयात्तावतो वारुणान् चतुष्कपालान्निर्वपेद्वरुणमेव स्वेन भागधेयेनोपधावति स एवैनं वरुणपाशान्मुञ्चति * इति श्रूयते । अत्र किमश्वदातुरिष्टिर्विधीयते उत तत्प्रतिग्रहीतुरिति सन्देहः । उपक्रमे हि प्रजापतिर्वरुणाय

प्रतिग्रहीत्रेऽश्वमनयद्दौ सोऽश्वदाता प्रजापतिः स्वां देवतामश्वदाने सम्प्रदानत्वेनात्मीयदेवतारूपं वरुणमार्च्छत्प्रापत् अश्वं दत्त्वा वरुणग्रहं जलोदरव्याधिपर्यायं प्राप्तवान्स प्रजापतिः पर्यदीर्यत तेन व्याधिना परितो दीर्णोभूदिति प्रजापतेरश्वदानेन दोषं सङ्कीर्त्य तस्य दोषनिर्हरणार्थमिष्ट्यनुष्ठानकीर्तनादश्वदातुरियमिष्टिर्विधित्सितेति गम्यते उपसंहारे च तत्प्रतिग्रहीतुर्विधीयमाना दृश्यते । न च स स्वां देवतामार्च्छदित्यादौ तच्छब्दानां वरुणपरत्वकल्पनायामुपक्रमे प्रतिग्रहीतुरेवेष्टिर्विधित्सिता गम्यते इति शक्यं वक्तुमिति वाच्यम् । विभक्त्यैक्यरूपेण तेषां प्रजापतिपरत्वौचित्यात् स्वां देवतामिति च वरुणं प्रत्येव वरुणस्य देवतात्वोक्त्ययोगात्तं निरवपदिति वरुणस्य वरुणोद्देशेन त्यागासम्भवाच्च, आत्मने सङ्कल्प्यमानस्य द्रव्यस्य स्वत्वनिवृत्त्यसम्भवात् । तस्मादस्ति तावदुपक्रमोपसंहारयोर्विरोधस्फूर्तिः भाव्यं च तयोरविरोधेनैकवाक्यतया । अतः किं विध्युद्देशानुसारेण प्रतिग्रहीतुरियमिष्टिः अर्थवादस्तु तथाश्वो दानप्रतिग्रहसम्बन्धे गर्हितो यदा दातुरप्रीयमिष्टिः स्यात्किमुत प्रतिग्रहीतुरिति कैमुत्यतात्पर्येण दूरं नेतव्यः किं वोपक्रमानुसारेण दातुरेव, प्रतिगृह्णातिस्तु कथं चिद्दान एव योजनीय इति सम्भवति संशयः। तत्र पूर्वः पक्षः । वेदोपक्रमाधिकरणे उपक्रमप्राबल्ये स्थितेपि नेह ततो निर्णयो युक्तः तत्रोपक्रमसङ्कीर्तिता वेदा उपसंहारगतैर्ऋगादिशब्दैरनुवदितुं शक्यन्ते वेदैकदेशत्वात् । ऋगादीनामुपक्रम एवोक्तेर्ऋग्वेद इत्यादिनावेदानामृगादिसम्बन्धस्य कीर्तिततया नात्यन्तपरित्यक्तोपक्रमार्थत्वाच्च । * ऋग्भिः पूर्वाह्णे दिवि देव ईयते यजुर्वेदे निष्ठति मध्ये अन्हः । सामवेदेनास्तमये महीयते वेदैरशून्यस्त्रिभिरेति सूर्य* इत्यादौ केवलानामृगादिशब्दानामृग्वेदादिषु लक्षणया वेदे दृष्टत्वाच्च । ऋचः सामानि यजूंषि प्रकृत्य सैषा त्रय्येव विद्येतिनिर्दिष्टस्य शब्दस्य त्रैविद्योयं ब्राह्मण इति वेदत्रयाभिज्ञनिर्देशे वेदत्रयपरतया लोकानां प्रयोगेण ऋगादिशब्दानां वेदेषु लक्षणाया लोकसम्मतत्वाच्च । अत एव तस्मिन्नधिकरणे * वेदो वा प्रायदर्शनादिति * सिद्धान्तसूत्रेण उपक्रमप्राबल्योक्त्यनन्तरं *लिङ्गदर्शनाच्च* त्रैविद्याख्याच्च तद्विदेति* सूत्राभ्यां वेदे लोके च प्रयोगेण लक्षणाया निरूढत्वं दर्शितम् । न चेह तथा प्रतिगृह्णातेर्दाने दृष्टप्रयोगः प्रत्युत तदत्यन्त-

विरुद्धार्थ एव । तेन तत्रोपक्रान्तमर्थमुपसंहारगतशब्दोऽनुवदितुमर्हतीति तत्रोपक्रमानुरोधेपि अत्र न तथेति विध्युद्देशस्य प्राधान्याप्राप्तविषयत्वाभ्यामवगतं प्राबल्यमव्याहतमिति तदनुरोधेनैवोपक्रमो नेतव्य इति । सिद्धान्तस्तु उपक्रमप्राबल्यन्यायेनैवालब्धात्मनि प्राधान्यस्य प्रयोजकत्वादप्राप्तविषयत्वस्यचासिद्धेः उपक्रम एवाश्वदातुः प्रजापतेर्वरुणग्रहनिर्मोचनहेतुत्वेनेष्टेः प्रशंसावशादश्वदातुरियमिष्टिर्विधास्यत इत्यवगतत्वात् । ततश्चार्थवादस्य विधिशक्त्यभावात्तावन्मात्रं ततोऽनवगतं विध्युद्देशाद्ग्राह्यं विधिविषयांशस्त्वर्थवादगत एवेति दान एव प्रतिगृह्णातियोंजनीयः । प्रतिगृह्णातीति प्रतिग्रहकर्तोच्यते यः प्रतिग्रहहेतुभूतं दानमाचरति सोपि प्रतिग्रहकर्तेति व्यपदिश्यते एव । हेतुकर्तर्यपि स्वव्यापारद्वारा प्रयोज्यव्यापारकर्तृत्वसत्वात् । तत्र प्रयोजकव्यापारकर्तृत्वरूपहेतुकर्तृत्वाविवक्षायां णिजन्तप्रयोगनियमेपि तद्व्यापारकप्रयोज्यव्यापारकर्तृत्वविवक्षयाऽणिजन्तप्रयोगोपि न विरुध्यते । न च साक्षात्कर्तृत्व एव तच्छक्तिः लुङ्लटोरनद्यतनाद्यतनसाधारण्येन भूतभविष्यन्मात्र इव कर्तृप्रत्ययानां साक्षात्परम्परासाधारण्येन कर्तृत्वमात्रे शक्त्युपगमात् । दृष्टश्च हेतुकर्तर्यप्यणिजन्तप्रयोगः यथा स्वामिनि सर्व्यवधानमात्रकर्तरि साक्षाद्विलेखनमकुर्वत्यपि षड्भिर्हलैः कर्षतीति । ततश्च प्रतिगृह्णातेः कर्षतेरिव साक्षात्कर्तृवचनत्वस्य मुख्यस्वातन्त्र्यविषयतयौत्सर्गिकत्वेपि कर्षतेः षड्हलोपादानसामर्थ्यात्प्रयोजककर्तृपरत्ववदस्यापि उपक्रमैकवाक्यतासामर्थ्यात्तत्परत्वमुपपद्यते । तेन यद्यपि वेदोपक्रमाधिकरणोक्तान्यत्रदर्शनरूपाभ्युच्चययुक्तिरिह नास्ति तथापि कर्षतिन्यायेन प्रयोगनिर्वाहादुपक्रमानुरोधेन निर्णयो युक्तः । किं च तत्र स वक्तव्योऽभ्युच्चयः उपक्रमे प्रजापतेस्तत्सृष्टतयाऽग्न्यादीनां तत्सृष्टतया वेदानां च कीर्तितत्वेनोपक्रमो वेदविषय एवेति निश्चेतुमशक्यत्वात् । तत्र वेदजनकाग्न्यादिजनकत्वेन प्रशंसया प्रजापतेर्वा प्रजापतिजातत्वेन वेदजनकत्वेन च प्रशंसयाऽग्न्यादीनां वा प्रजापतिसुताऽग्न्यादिजातत्वेन प्रशंसया वेदानां वा किञ्चिद्विधास्यत इत्यवगते उपसंहारगतानामृगादीनां च तेषामन्यतमत्वाभावेनगर्गादिशब्दानां यथाश्रुतार्थसम्भवे तेषामुपक्रान्तेषु प्रजापत्यादिषु किम्परत्वमवसेयमित्यत्र नियामकत्वेन तेषां वेदेषु लक्षणानिरूढिप्रदर्शनापेक्षणात् । न

त्वत्र तदपेक्षास्ति । अत्रोपक्रमे वारुणेष्टिर्वरुणग्रहनिर्मोचनहेतुत्वेन प्रशस्यत इति व्यवस्थितस्तुत्यधिगमात् । तस्मादिहाप्युपक्रमानुरोधेन निर्णय इति उपसंहारादुपक्रमः प्रबल इति ।

अत्रकेचिदर्वाचीनाः कल्पयन्ति । उपक्रमादुपसंहारो बलीयान् तद्व्याख्यानरूपत्वात् । एकस्मिन्वाक्येहि प्रथमभागेन क्वचिदर्थे धीते चरमभागस्य तद्विरोधिनोऽवैयर्थ्याय तद्व्याख्यानरूपत्वं कल्पनीयं व्याख्यानस्य पाश्चात्यत्वनियमात् । लोके गामानय बलीवर्दमानयेत्यादौ तथा दर्शनाच्च । व्याख्येयस्य च निश्चितप्रामाण्यव्याख्यानुसारेणार्थनिर्णयो युक्तः व्याख्यानतो विशेषप्रतिपत्तिरिति प्रसिद्धेः । वेदे * प्युग्रं वचो अपावधी * मित्यादिमन्त्राणामशनया पिपासेह वा उग्रं वच्च इत्यादिव्याख्यानरूपब्राह्मणानुसारेणार्थाङ्गीकाराच्च । तथा परत्वादप्यपच्छेदाधिकरणन्यायेनोपक्रमादुपसंहारो बलीयान् । षष्ठ *पौवापर्ये पूर्वदौर्बल्यं प्रकृतिवदिति* । अपच्छेदाधिकरणे ज्योतिष्टोमे अध्वर्यु प्रस्तोता ऽन्वारभते प्रस्तोतारमुद्गाता उद्गातारं प्रतिहर्त्तेत्यादिक्रमेण अन्वारभ्य प्रसर्पतामध्वर्वादीनां मध्ये यदि क्वचिदुद्गातृप्रतिहर्त्रोः क्रमेण अन्वारम्भविच्छेदः स्यात् तदा तन्निमित्तयोः प्रायश्चित्तयोर्यद्युद्गाताऽपच्छिद्येत अदक्षिणो यज्ञः संस्थाप्य इति यदि प्रतिहर्त्ताऽपच्छिद्येत सर्ववेदसं दद्यादिति विहितयोरदक्षिणक्रतुसमापनसर्वस्वदक्षिणादानरूपयोर्विरुद्धयोः समुच्चित्याऽनुष्ठानाशक्तेरन्यतरस्मिन्ननुष्ठेये किं पूर्वनिमित्तकमनुष्ठेयं उतोत्तरनिमित्तकमिति संशय्यानुपसञ्जातविरोधित्वात्पूर्वनिमित्तकमनुष्ठेयमिति प्राप्ते परनिमित्ते सति तन्निमित्तशास्त्रस्य दुर्निवारप्रवृत्तिनिमित्तत्वात् तस्य चपूर्वाबाधेनानुत्पत्तेः पूर्वोपमर्देनैवोत्पत्तिनियमात्परनिमित्तमेवानुष्ठेयमिति सिद्धान्तितम् । उक्तं च । पूर्वं परमजातत्वादबाधित्वैव जायते । परस्यानन्यथोत्पादान्नाद्याबाधेन सम्भव इति ।

यत्त्वनुपजातविरोधित्वादुपक्रमस्य प्राबल्यमुक्तं तन्न । सर्वत्रापातजप्रत्ययस्यैवप्राबल्यप्रसङ्गेन विमर्शवैयर्थ्यापत्तेः अतो नोपक्रमस्य प्राबल्यं युक्तम् । नचैवं वेदोपक्रमाधिकरणविरोधः । न हि तत्रोपक्रमानुरोधेन स्वराणां वेदधर्मत्वनियमः किं तु तस्यर्गादिधर्मत्वे ऋच्यध्यूढं साम गीयत इति वचनाद्गाधारगीतिरूपे साम्न्यप्युच्चैष्टुमु-

ब्रैर्ऋचाक्रियत इति अत एव सिध्यतीत्युच्चैस्साम्नेत्यस्य वैयर्थ्यापत्तेः पश्चात्तनतद्विध्यनुरोधेन । अतएव वेदोवा प्रायदर्शनादिति प्राथम्यरूपप्रायदर्शनेऽपरितोषेण धर्मोपदेशाच्चेतिसूत्रे इदमेव हेतूकृतम् । किञ्चोपक्रमे वेदशब्दस्त्रयो वेदा अजायन्त अग्नेर्ऋग्वेदो वायोर्यजुर्वेदः आदित्यात्सामवेद इत्यभ्यस्तमभ्यासश्चोपसंहारात्प्रबलः बहुबाधस्यान्याय्यत्वादिति तत एव निर्णयोस्तु । एवं च प्रायोवचनाच्चेत्यादाविव सूत्रस्थप्रायशब्दस्य बाहुल्यमर्थो लभ्यत इति न प्राथम्यं क्लिष्टतया तदर्थ इति कल्पनीयम् । अपिचर्ग्वेदमधीतवानित्यादिलौकिकप्रयोगाद्दर्शिभिः पूर्वाह्ण इति वैदिकप्रयोगाच्चर्गादिशब्दास्तत्तद्वेदवाचका इति नाम्नोपक्रमोपसंहारवैरूप्यमपि येनोपक्रमानुसारेण निर्णयः शङ्क्येत । तस्मान्न वेदोपक्रमाधिकरणविरोधः नाप्यश्वप्रतिग्रहेष्ट्यधिकरणविरोधः । तत्रापि नोपक्रमानुसारेण दातुरिष्टिरिति निर्णयः किं तु कर्माङ्गत्ववशेन । तथा हि । अस्मादधिकरणात्पूर्वतने *दीक्षास्विष्टिर्लौकिकेत्या*दित्यधिकरणे इयमिष्टिरश्वप्रतिग्रहवतः कर्मणोऽङ्गं न स्वतन्त्रेतिस्थितम् । यदैवं स्थितं तदाऽङ्गप्रधानानामेकदेशकालकर्तृकत्वस्यापाताद्यः क्रतोः कर्ता तेनैवेयमपि कर्तव्या सिद्ध्यति । क्रतोः कर्ता स्वामी कर्मपरिक्रयादिति न्यायात् अश्वस्य दाता न प्रतिग्रहीता तस्मात्कर्माङ्गवशेन निर्णयो न तूपक्रमानुसारेण कथमन्यथा मैत्रायणीयशाखायां स एषोश्वः प्रतिगृह्यत इति । यदा तूपक्रमं विनाऽऽम्नातेयमिति दातुरिति सिद्ध्येत् । उक्तं च तन्त्रसारे । मैत्रायणीयशाखायां दात्रुपक्रमतोश्रुतेः । कर्माङ्गत्ववशादेव दातुरिष्टिः प्रतीयत इति । वार्तिककृतापि सा लिङ्गादार्त्विज्ये स्यादित्यधिकरणे सिद्धान्तसूत्रे लिङ्गपदमङ्गस्य प्रधानैकैककर्तृकस्य सत एव यदुपकारजननसामर्थ्यन्तत्परमिति व्याकृत्य कर्माङ्गत्वेन दातुरिष्टिरिति निर्णयः कृतः । गुरुणाप्यधिकारान्तराकल्पनालाघवानुसारेण दातुरिष्टिरिति निर्णयः कृतः । न तूपक्रमप्राबल्येन यद्युपक्रमगतस्य दातुरिष्टिः स्यात्तदाऽश्वदानप्रयुक्तपौण्डरीकानुप्रवेशात्तत्फलेनैव फलवत्वमित्यधिकारान्तरस्याकल्पनीयत्वाल्लाघवं प्रतिग्रहीतुश्चेत्तस्य फलान्तरं कल्पनीयमिति गौरवं स्यादिति ।

यद्वा भाष्यकारान्तरैरत्र प्रतिग्रहीतुरेवेयमिष्टिर्व्यवस्थापितेति वार्तिकादिषूक्तत्वात् प्राभाकरैरपि पौण्डरीके श्रूय-

त इति कृत्वाचिन्तयेदमधिकरणं अन्यथा दातुरीप्सितरिति सिद्धान्तासिद्धेरितिवदद्धिः वस्तुतः प्रतिग्रहीतुरेवेयमिष्टिरित्याशयस्य स्फुटीकरणात् । याज्ञिकैरपि तथैव स्वीकृतत्वाच्च प्रतिग्रहीतुरेवेयमिष्टिरस्तु । अतो न क्वापि परेषामुपक्रमप्राबल्यशङ्का तेषामप्युपसंहारप्राबल्यानुपगमेऽक्ताधिकरणादिसिद्धान्तनिर्वाहो न स्यात् । अक्ताधिकरणे अक्ताः शर्करा उपदधाति तेजो वै घृतमित्यत्र येन केन चिद् घृततैलवसादीनामन्यतमेन द्रव्येणाञ्जनं कर्तव्यं विधौ विशेषाश्रवणादिति प्राप्ते वाक्यशेषे घृतसङ्कीर्तनात्तेनैवेति सिद्धान्ततम् । इदमुपसंहारप्राबल्यानभ्युपगमे न निर्वहति । उपक्रमप्राबल्येऽप्युपक्रमेऽञ्जनक्रियाक्षिप्तद्रवद्रव्यसामान्यनिश्चयाद्वाक्यशेषस्थस्य घृतपदस्य गुणेत्वन्याय्यकल्पनेति घृताघृतलक्षकत्वं वा घृतस्तुतेरेवाष्टाकपालादिस्तुतेरेवयवद्वाराऽवयविद्वादशकपालस्तुतौ पर्यवसानवद्विशेषणद्वारा सामान्यस्तुतौ पर्यवसानं वा कल्प्यत* विप्रतिपत्तौ विकल्पः स्यादसमत्वादगुणे त्वन्याय्यकल्पनैकदेशत्वादिति*नार्यमिकाधिकरणेऽग्नीषोमीयपशौ श्रुतस्यादितिः पाशान्प्रमुमोक्तिति मन्त्रस्य पाशबहुत्वानुसारेण बहुपशुकेपूत्कर्षे प्राप्ते प्रधानस्य प्रातिपदिकार्थस्य पाशस्य विभक्त्यर्थस्य कर्मकारकस्य च प्रकृतेसम्भवादगुणभूतायास्तदबहुत्वसङ्ख्यायास्तत्रासम्भवे पि गुणानुसारेण नोत्कर्षो युक्त इति कथञ्चित्पाशावयवबहुत्वाभिप्रायेण छान्दसतया बहुवचनं नेतव्यमित्युक्तम् । तथा *पूर्ववन्तोविधानार्था* इति प्रमाणलक्षणाधिकरणे वैश्वानरं द्वादशकपालं निर्वपेत्पुत्रे जाते यदष्टाकपालो भवति गायत्र्यैवैनं ब्रह्मवर्चसेन पुनाति यन्नवकपालस्त्रिवृतैवास्मिन्तेजो दधाति यद्दशकपालो विराजैवास्मिन्नन्नाद्यं दधाति यदेकादशकपालस्त्रिष्टुभैवास्मिन्निन्द्रियं दधाति यद्द्वादशकपालो जगत्यैवास्मिन्पशून्दधाति यस्मिन्जातएतामिष्टिंनिर्वपति पूत एव तेजस्व्यन्नाद इन्द्रियावी पशुमान्भवतीति जातेष्टिविधावष्टाकपालादिशब्दा किं जातेष्टिमाश्रित्य ब्रह्मवर्चसादिफलादेशेन गुणविधायका उत द्वादशकपालस्तुत्यर्थार्थवादा इति संशय्य द्वादशसु कपालेषु संस्कृतस्य पुरोडाशस्य द्वादशकपालशब्दाभिधेयस्य विहितस्याष्टाकपालादिशब्दैर्ग्रहणासम्भवेन तत्स्तुत्ययोगादष्टाकपालादिशब्दार्थस्याष्टाकपालादिसंस्कृतपुरोडाशस्याविहितत्वेन स्तुत्ययोगाच्चार्थवादत्वासम्भवेन गुणफल-

विधय इति पूर्वपक्षे प्राप्ते वैश्वानरं द्वादशकपालमित्युपक्रान्ताया इष्टेर्यस्मिन्जात इत्यादिनोपसंह्रियमाणतयोपक्रमोपसंहारैकरूपावगमितप्रधानभूतैकवाक्यत्वभङ्गप्रसङ्गान्न मध्ये गुणविधयोक्ताः कथं चिदष्टसंख्याऽवयवद्वारावयविद्वादशकपालस्तुत्यर्था एतेऽर्थवादा इत्युक्तम् । *सन्दिग्धे तु वाक्यशेषा*दित्यधिकरणे ऽक्ताः शर्करा इत्युपक्रमगतं सन्दिग्धमक्तपदं वाक्यशेषगतेन घृतपदेन निर्णीयते न तु बाध्यत इति चेन्न । अक्तपदस्याक्षादिपदवन्नानार्थत्वाभावेनार्थसन्देहाभावाद्विशेषसन्देहस्य घृतस्य नवपुराणादित्वादिसम्भवेन तादवस्थ्यात् । ननु तथापि सामान्यस्य विशेषपर्यवसानौचित्याद्विशेषविषयत्वादिहार्थवादानुसरणं नतूपसंहारवत्वादिति चेन्न । विशेषस्यापि सामान्योपलक्षकत्वसम्भवेन सामान्यस्य विशेषपर्यवसाननियमाभावाद्विशेषेणोपक्रम्य सामान्येनोपसंहारेप्युपसंहारानुसारेणोपक्रमस्थविशेषशब्दस्य सामान्यपरताया विष्णुशर्मा भोज्यतां ब्राह्मणः प्रशस्त इत्यादौ सिद्धत्वाच्च । ननु सामान्यशब्दस्योपसंहारानुसारेण सङ्कोचमात्रं न तु बाध इति चेन्न । सङ्कोचस्याप्येकदेशबाधत्वात् । अन्यथा पदशास्त्रेणाहवनीयशास्त्रस्य वाक्यादिना प्रकरणादेश्च सङ्कोचो बाधो न स्यात् । नन्वक्ताः शर्करा उपदधातीति वर्तमानापदेशेन प्रत्यक्षस्य विधेः स्तुत्युन्नेयत्वादुपजीव्यस्तुतिसमर्पकतया इहार्थवादोऽनुसृतो न तूपसंहारत्वादिति चेन्न । आख्यातश्रवणकाले वर्तमानोपधानाभावेन पञ्चमलकारकल्पनया वसन्ताय कपिञ्जलानालभत इत्यादिभिरर्थवादवाक्य इवस्तुतिमनपेक्ष्यैव विधिसिद्धेः इमां स्पृष्ट्वोद्गायेत् इमां ह्यौदुम्बरीं विश्वा भूतान्युपजीवन्तीति विषयवाक्यान्तरे लिङ एव श्रवणाच्च । ननु शब्दभावनेति कर्तव्यतारूपां प्ररोचनां विना प्रवर्तकस्य विधेरपर्यवसानाद्विधिना स्वसमाप्त्यर्थमपेक्षितत्वादिहार्थवादोऽनुसृतो नतूपसंहारादिति चेन्न । उपक्रमप्राबल्ये गुणभूतार्थवादस्थघृतशब्दस्य घृताघृतलक्षकत्वादिना स्तुतिपरत्वकल्पनैव निर्वहणीयत्वप्रसङ्गात् । तस्मात्प्रकारान्तरायोगादुपसंहारप्राबल्यादेवाधिकरणसिद्धान्तो निर्वाह्यः । तथा षष्ठे पशुचोदनायामनियमो विशेषा*दित्यधिकरणे यदग्नीषोमीयं पशुमालभेतेति विधौ विशेषाश्रवणाद्यः कश्चित्पशुरालब्धव्य इति प्राप्ते छागस्य वपाया मेदसोनुब्रूहीति मन्त्रे छागरूपविशेषश्रवणात्स एवाल-

ब्धव्य इति विधिप्रापितकर्मसमवेतद्रव्यप्रकाशकतया तदुपसंहार-रूपमन्त्रानुसारेण(१)सिद्धान्तीऽप्युपसंहारप्राबल्येन निर्वाह्यः। उपक्रमप्राबल्ये विधौ पशुसामान्यालब्धव्यत्वनिश्चयात्तदनुसारेणोपसंहार-मन्त्रस्थछागशब्दस्यापि तत्सामान्योपलक्षणत्वप्रसङ्गात् । तद्व्यपदेशाधिकरणे श्येनेनाभिचरन्यजेतेति विधौ श्येनशब्दमुख्यार्थत्वाय श्येनद्रव्यको यागः कर्तव्य इति प्राप्ते 'यथा वै श्येनो निपत्यादत्ते एवमयं द्विषन्तं भ्रातृव्यं निपत्यादत्ते ' इति वाक्यशेषे मुख्यश्येनेऽसम्भवतः श्येनसादृश्यस्य वर्णनानुरोधेन श्येनशब्दस्य याग एव गौणी वृत्ति(२)र्वाक्यशेषानुसारेणेति सिद्धान्तोऽप्युपसंहारप्राबल्येन निर्वाह्यः। उपक्रमप्राबल्ये तत्स्थश्येनपदमुख्यार्थानुरोधेन वाक्यशेषस्य रामरावणयोर्युद्धं रामरावणयोरिवेति वत्कथञ्चिदभेदेपि सादृश्य(३)-वर्णनप्रसङ्गात् ।

तथा चतुर्थे * फलसंयोगस्त्वचोदिते न स्यात् तस्याशेषभूतत्वा * दित्यधिकरणे जातेष्टेः पूत एव तेजस्वीत्यादिवाक्यशेषोक्तं फलमिष्टिकर्तुः पितुरेव न पुत्रस्यान्यगामिफले कर्मण्यन्यस्य प्रेरणानुपपत्तेरिति प्राप्ते येन वाक्यशेषानुसारेण फलमेतदुपनीयते तेन पुत्रगतमेवोपनीयते इति वचनप्रामाण्यात्पुत्रस्यैव फलमिति सिद्धान्तोऽप्युपसंहारप्राबल्येनैव निर्वाह्यः । अन्यथोपक्रमे पुत्रे जात इत्यसंवलितनैमित्तिकाधिकारतया प्रतीतायास्तस्या वाक्यशेषानुसारेण पुत्रगतपूतत्वादिफलकामसंवलितस्याप्राप्तेः तदा हि वाक्यशेषोऽर्थवादमात्रमेव स्यात् । किञ्चोपक्रमप्राबल्यवादे किमुपक्रमे प्रतीतमात्रस्य ग्राह्यत्वं किं वोपसंहारपरामर्शेन व्यवस्थितस्य, आद्ये श्येनादिवाक्यं श्येनादेर्ग्राह्यत्वापत्तिः द्वितीये उपसंहारस्यैव प्राबल्यं सिध्येदिति पूर्वः पक्षः ।

अत्र ब्रूमः । यत्तावदुपसंहारे प्राबल्ये कारणमुक्तं व्याख्यानरूपत्वम् । तत्र । तत्र किं (४) व्याख्येयपदोपादानेन स्पष्टं व्या-

(१) नेति अधिकं खपुस्तके । (२) वृत्तिरिति खपु० पा० ।

(३) सादृश्यपरत्वमिति खपु० पा० ।

(४) विरोधात् व्याख्यानरूपत्वमुत व्याख्येयपदोपादानेन व्याख्यानरूपत्वमित्याशयः आद्ये तत्तु न स्पष्टं परस्परविरोधपरिहाराय कल्प्य मिति चेन्नाद्यः इति खपु० पा० ।

ख्यानरूपत्वमित्याशयः उत परस्परविरोधपरिहाराय कल्प्यमिति । नाद्यः अप्रसिद्धेः । द्वितीये प्रथमश्रुतस्यैव चरमश्रुतव्याख्यानरूपत्वं किमिति न कल्प्यम् । व्याख्येयोपस्थितिसापेक्षत्वाद्व्याख्यानप्रवृत्तेस्तस्य पाश्चात्यत्वं नियतमिति चेन्न । पाश्चात्यभागश्रवणानन्तरमन्यतरस्य व्याख्यानरूपत्वकल्पकं विरोधप्रतिसन्धानं यदाऽवतरति तदा विरोधप्रतियोगित्वेन भागद्वयस्याप्युपस्थितत्वाविशेषेण प्रथमभागस्यापि पाश्चात्यभागव्याख्यानरूपत्वकल्पनोपपत्तेः । लोके पुङ्गवं पश्य देवनायाक्षमानयेत्यादौ प्रथमश्रुतस्यापि चरमश्रुतव्याख्यानरूपत्वदर्शनात् । व्याकरणे च वृद्धिरादैजित्यादेः सिचि वृद्धिरित्यादिचरमश्रुतसूत्रस्थवृद्ध्यादिपदव्याख्यानरूपत्वदर्शनात् । तस्मात्परस्परविरोधस्थले परस्परव्याख्यानरूपत्वकल्पनमप्रमाणमिति नोपसंहारप्राबल्ये व्याख्यानरूपत्वं कारणम् । यत्तत्र परत्वं कारणमुक्तं पूर्वोपमर्देन परस्योत्पत्तिरिति । तदपि तुच्छम् । यदि हि परमुत्पद्येत तर्ह्येव तस्य पूर्वोपमर्देनोत्पत्तिरिति स्यात् न त्वत्र तस्योत्पत्तिः सम्भवति । तथा हि । किमत्रोपक्रमबाधकत्वेनाभिमतमुपसंहारार्थगोचरज्ञानमुपक्रमान्वितस्वार्थगोचरम्(१)पयते तदनन्वितस्वार्थगोचरं वा । नाद्यः । परस्परविरुद्धयोरुपक्रमोपसंहारयोरन्यतरस्य लक्षणया विरोधसमाधानात्प्राक्समभूयकारित्वासम्भवेन तदयोगात् । उपक्रमस्य लक्षणाऽभ्युपगम्यत इति चेन्न । उपक्रमबाधकत्वाभिमतोपसंहारार्थविषयज्ञानोदयात् प्रागुपक्रमप्रतीतार्थपरित्यागे कारणाभावेन तल्लक्षणाकल्पनस्य तद्बाधकत्वाभिमतज्ञानोदयस्य च परस्पराश्रयग्रस्तत्वेनैकस्याप्यसम्भवात् । न द्वितीयः । एकस्मिन्वाक्ये पूर्वपूर्वभागार्थान्वितस्वार्थबोधकत्वस्यैव व्युत्पत्तिसिद्धतया तदनन्वितोपसंहारार्थविषयज्ञानासम्भवात् । तथा व्युत्पत्तिनियमानभ्युपगमेऽप्युपक्रमोपसंहारयोर्विध्यर्थवादत्वादिरूपेणैकवाक्यत्वमनुसन्दधतामुपक्रमैकवाक्यत्वानुपपत्त्योपसंहारस्य लक्षणाकल्पनां विना मुख्यार्थबोधासम्भवात् । उपक्रमस्याप्युपसंहारैकवाक्यत्वानुपपत्तिस्तुल्येति चेत् । सत्यम् । उपक्रमदशायामुपसंहारो विरोधी नोपस्थित इति तदेकवाक्यत्वानुपपत्तिस्वरूपसती न प्रति-

---

(१) मुपेयमिति खपु० पा० ।

बन्धिका। इह तु ज्ञाताऽनुपपत्तिः प्रतिबन्धिकेति विशेषः। उपसंहारादप्युपक्रमैकवाक्यत्वमननुसन्दधतां मुख्यार्थबोधः सम्भवतीति चेन्न। तथाप्युपक्रमैकवाक्यत्वे उपसंहारादर्थप्रत्ययकाले वेदपाठक्रमानुसारेण नियमतोऽनुसन्धातुं योग्ये विद्यमाने उपक्रमाश्रवणतदर्थानवगमतद्भिन्नवाक्यत्वभ्रमात्पुरुषदोषमात्रेणाननुसन्धीयमाने सम्भवतः तस्मिन्ननुसन्धीयमानेऽसम्भवतः प्रत्ययस्यापातप्रत्ययत्वेन तस्योपक्रमबाधकत्वायोगात्। अन्यथा परप्राबल्येप्युपक्रमस्य पूर्वत्वमननुसन्दधतां पश्चाच्छ्रुतात्तस्मात्प्रथमश्रुतोपसंहारैकवाक्यत्वाननुसन्धानेन जातस्य ज्ञानस्योपसंहारबाधकत्वापत्त्योन्मत्तकोक्तित्वप्रसङ्गात्। न ह्युद्गातृप्रतिहर्तृपच्छेदयोरिवोपक्रमोपसंहारयोर्यदा यः पश्चात्पर्यालोचितस्तदा तत्पूर्वस्य बाध इत्यनियतो बाध्यबाधकभावः परेणाप्यङ्गीक्रियतेऽतोत्र न परप्राबल्यन्यायावतारः किन्तु यत्रापच्छेदादौ वस्तुतोऽप्येकवाक्यत्वाभावात्तदनुपपत्त्यभावेन परं निर्दोषं ज्ञानमुत्पद्यते तत्रैव तस्य परत्वेन पूर्वबाधकत्वम्। य(१)त्वेकवाक्यत्वं तत्र वेदपाठक्रमानुसारेण प्रथमोपस्थितोपक्रमार्थज्ञानानन्तरन्तदेकवाक्यतयोपनिपतन् उपसंहारस्तद्विरुद्धार्थश्चेन्न मुख्यार्थतया तेनान्वेतुं युक्त इति लक्षणाकल्पनापूर्वकं तदेक(२)कण्टकनयैव तस्यार्थबोधकत्वं न तु तद्विसम्प्रतिपत्त्योपक्रमाननुसन्धाने तद्विसम्प्रतिपत्त्या बोधकत्वसम्भवेपि तदानीन्तनज्ञानं दोषजन्यमापातप्रत्ययरूपमेवेति तद्विरुद्धार्थनिर्दोषज्ञानोदयाभावात् न तस्य परत्वेन बाधकत्वशङ्का। अतेनोपक्रमप्राबल्ये आपातप्रत्ययस्यैव सर्वत्र प्राबल्यापत्त्या विमर्शनैयर्थ्यापत्तिरित्यपि परास्तम्। पूर्वेण परमुत्पत्तिप्रतिबन्धेन हि बाधनीयं न त्वप्रसंहारप्रत्ययं उपक्रमैकवाक्यत्वानुपपत्तिवत् श्येनादिवाक्यादापातप्रत्ययानन्तरं न्यायानुगृहीतवाक्यार्थज्ञानोत्पत्तौ किं चित्प्रतिबन्धकमस्ति ततश्च न्यायेन निरुपपत्तिकं पूर्वप्रत्ययं निरस्कुर्वत्परमुत्पद्यते इति न पूर्वप्राबल्ये एतादृशशङ्कावकाशः।

किं च प्राबल्येपि न्यायानुगृहीतवाक्यार्थज्ञानानन्तरं न्यायाभासदुष्टितचित्तस्य तदेवापातज्ञानं पुनरपि सम्भवतीति तेन तस्य बाधः किन्न स्यात्। न च तत्रापि बाधाभिमान इष्ट इति वाच्यम्। वस्तुतो

---

(१) यत्रत्वेकेति खपु० पा०। (२) तदेकवाक्यतयैवेति खपु० पा०।

बाधप्रयोजके परत्वे सति तेनैव भाव्यतयाऽभिमानमात्रेणाचरितार्थत्वात् सन्न्यायोपबृंहितवाक्यार्थज्ञानस्य तद्विरोधिज्ञानं परत्वेपि न बाधकमिति चेत् पूर्वत्वेप्येवं वक्तुं शक्यमिति किमिति नावबुध्यसे। यत्तूपक्रमाधिकरणे उपक्रमप्राबल्यमनपेक्ष्य न्यायान्तरेण स्वराणां वेदधर्मत्वनिर्णय इत्युक्तम्।तत्र न तावदगादिधर्मत्वे उच्चैः साम्नित्यस्य वैयर्थ्यापत्तेस्तेषां वेदधर्मत्वनिर्णाय इत्यु(१)क्तम् । ऋगा(२)ध्यारूढेषु स्तोभाक्षरनिर्वर्त्यगीतिभागेषूच्चैष्ट्वसिद्ध्यर्थतया तस्य सार्थकत्वात् । ननु पूर्वपक्ष्युपपादितरीत्यर्चामुच्चैष्ट्वे तदारूढे साम्नि स्वरान्तरं कर्तुं न शक्यत इति ततः साम्न्युच्चैष्ट्वसिद्धिरुच्यते चेत्तदनध्यारूढेषु स्तोभगीतिभागेषु स्वरान्तरस्य कर्तुमशक्यतया तत्प्रसक्तौ तेषूच्चैष्ट्वनियमसिध्यर्थत्वेनोच्चैस्साम्नेत्यस्य सार्थकत्वं स्यादिति दूषणं भवतु नाम । मीमांसकमर्यादा तु न भविष्यति । उच्चैर्ऋचा क्रियत इति ऋक्करणकभावनायां विधीयमानस्योच्चैष्ट्वस्योच्चैः प्रवर्ग्येण चरन्तीति प्रवर्ग्यकरणकभावनायां विधीयमानस्येवाङ्गप्रधानार्थतयाऽक्षराभिव्यक्तिद्वारा ऋगङ्गे साम्नीव गीतिकालपरिच्छेदकत्वेन तदङ्गेषु स्तोभगीतिभागेष्वपि तत एवोच्चैष्ट्वलाभात् ।

सत्यम् । एवमपि प्रजापतेर्हृदयादिसामसु ऋगङ्गेषु उच्चैस्साम्नेत्यस्य सार्थकत्वं न निवार्यते।प्रजापतेर्हृदयादि ज्योतिष्टोमे नास्तीति चेन्माभूत् यत्रास्ति तत्र सार्थक्यं भविष्यति।तथासति प्रकरणादुत्कर्षःस्यात् इति चेत् ।तर्हि सिद्धान्ते नास्ति तत उत्कर्षः। अवश्यं हि तस्य सिद्धान्तेप्युत्कर्षो वाच्यः । ज्योतिष्टोमस्य* भूयस्त्वेनोभयश्रुती* त्यधिकरणे याजुर्वैदिकत्वव्यवस्थापनेन तदङ्गानां केषां चित्सामवेदविहितत्वेपि वेदान्तरविहितानामङ्गानां साङ्गप्रधानविधायकप्रधानवेदस्वर एव नाङ्गवेदस्वर इति * गुणमुख्यव्यतिक्रमे तदर्थत्वान्मुख्येन वेदसंयोग * इत्यधिकरणे व्यवस्थापनेन च ज्योतिष्टोमतदङ्गेषु सामवेदस्वरस्य निरवकाशत्वात् । त्रयाणामपि वेदस्वरविधीनां प्रकरणादबलीयोभिर्वाक्यै स्तत्तद्वेदविहितसकलकर्मविषयत्वमभ्युपगम्यैव गुणमुख्यव्यतिक्रमाधिकरणे याजुर्वैदिकाधानाङ्गस्य

---

(१) इति युक्तमिति खपु० पा० ।
(२) ऋगनध्यारूढेषु इति ख० पु० पा० ।

सामवेदोत्पन्नस्य वारवन्तीयसाम्नः प्रधानवेदस्वर एव नोत्पत्तिवेदस्वर इति निर्णीतत्वाच्च । अपि च स्वरविधीनामृगादिधर्मत्वपक्षे उच्चैस्साम्नेत्यस्यानुत्कर्षो वक्तुं शक्यः । प्रजापतेर्हृदयनापि पक्षं प्रत्युपतिष्ठत इत्यग्नौ श्रवणात् । अग्नश्च प्रकृतौ ज्योतिष्टोमे ऽपि सद्भावस्य दाशमिके* अग्न्यतिग्राह्यस्य विकृतावुपदेशादप्रवृत्ति* रित्यधिकरणे समर्थितत्वात् । ननु च प्रजापतेर्हृदयादिमात्रविषयत्वे उच्चैः साम्नेति स्वरविधानमल्पविषयमनर्थकप्रायं स्यात् अत एव प्रजापतेर्हृदयादिविषयत्वे इदमेव दूषणं वार्तिके दर्शितमिति चेन्न । वेदधर्मत्वपक्षे ऽपि त्रयाणामपि स्वरविधीनां वाचनिकस्मरान्तरविधानादिविषयपरिहारेण उपक्रमप्राबल्यमेव मूलयुक्तिः धर्मोपदेशादित्यभ्युच्चयमात्रमिति दर्शयितुमेव वार्तिके प्रजापतिहृदयविषयत्वेन सार्थकत्वशङ्कामुद्भाव्य तत्र तात्कालिकं समाधानाभासं प्रदर्श्य तदाभासत्वमप्यत्र स्वयमेवाविष्कृतम् । तस्माद्धर्मोपदेश इत्यभ्युच्चय इति न ततो वेदधर्मत्वनिर्णय इत्यु(१)क्तं नाप्यभ्यासात्तन्निर्णय इत्युक्तम् । बहुबाधस्याप्यन्याय्यत्वादिति हि तत्रमूलम् । नचाभ्यस्तवेदशब्दार्थबाधे बहुबाधः चतुर्णामेव हि वेदशब्दानां तदा लक्षणा स्यात् ऋगादिशब्दार्थबाधे त्वग्नेर्ऋग्वेद इत्यादावृचेर्ऋचा क्रियत इत्यादौ च श्रुतानां षण्णामृगादिशब्दानां लक्षणेति तत्रैव बहुबाधः स्यादिति नात्राभ्यासप्राबल्यं वेदशब्दार्थबाधे ह्यग्नेर्ऋग्वेद इत्यादावप्यृगादिशब्दार्थबाध आवश्यकः अभिन्नार्थयोः सामानाधिकरण्यस्यान्यतरलक्षणया समर्थनीयत्वात् । किंचाग्नेर्ऋग्वेद इत्यादौ तस्माद्दचा क्रियत इत्यादौ चर्गादिशब्दस्याप्यभ्यासः । न च वेदशब्दश्चतुर्वारमावर्त्तितः ऋगादिशब्दास्तु द्विवारमित्यृगादिशब्दाभ्यासाद्वेदशब्दाभ्यासो गरीयानिति वाच्यम् । उच्चैष्टुमृग्धर्मो वेदविशेषधर्मो वोपांशुत्वं यजुर्धर्मो वेदविशेषधर्मो वे(२)त्यादिसन्देहत्रयापाकरणाय प्रत्येकं वेदशब्दाभ्यासे वक्तव्ये त्रयो वेदा अजायन्तेति साधारणोपक्रमगत एकस्तत्तद्ऋगादिशब्दसमानाधिकृत एक इति प्रत्येकं वेदशब्दद्वयस्यैव सम्भवेन साम्याद्यजुरादिशब्दसमानाधिकृ-

---

(१) इति न युक्त मिति खपु० पा० ।

(२) उच्चैष्टुं सामधर्मो वा वेदशेषधर्मोवेति उपांशुत्वादित्रयसन्देहेत्याद्यधिकं खपु० पाठे ।

तवेदशब्दस्य भिन्नविषयस्यर्गादिशब्दार्थनिर्णयेऽनुपयोगात् । तस्मा-न्नाभ्यासाद्वेदधर्मत्वनिर्णयः शक्यःकर्तुमिति सूत्रस्थप्रायशब्दस्य बाहु-ल्यार्थो भाष्यकारादिभिर्न स्पृष्टः ।

यत्त्वृगादिशब्दानामपि वेदवाचकत्वादुच्चैष्ट्वादीनां वेदध-र्मत्वनिर्णय इत्युक्तम् । तत्तुच्छम् । तेषा मृग्यत्रार्थवशेन पाद-व्यवस्थेत्यादिशब्दार्थनिर्णयाभियुक्तानादिवृद्धव्यवहारानुसारेणर्क् एव मधुकृत ऋग्वेद एव पुष्पं यजूंष्येव मधुकृतो यजुर्वेद एव पु-ष्पं सामान्येव मधुकृतस्सामवेद एव पुष्पमित्यादिवैदिकप्रयो-गानुसारेणर्गादिशब्दानां मन्त्रविशेषादिवाचकत्वेऽवश्याङ्गीकर्तव्ये त-त्सम्बन्धविशेषादेव तेषां वेदविशेषेषु लक्षणया प्रयोगोपपत्त्याऽने-कार्थकल्पनस्यान्याय्यत्वात् । यत्तु क्वचिदुक्तं निगदाधिकरणोदाहृते-न वेदोपक्रमरहितेनोच्चैर्ऋचा क्रियते नीचैस्साम्नोपांशु यजुषोच्चैर्निग-देनेति वाक्येनोच्चैस्त्वादेर्मन्त्रधर्मतया उक्तत्वात् वेदोपक्रमता-प्युच्चैर्ऋचेत्यादिवाक्येन मन्त्रधर्मताया उक्तावेकस्मिन्साम्युच्चैष्ट्व-नीचैष्ट्वयोर्विरुद्धयोरप्यदोषदुष्टो विकल्पः प्रसज्येतेति वेदोपक्रम-वाक्ये वेदधर्मता नतूपक्रमप्राबल्यात् तथा चेदमपि वे-दोपक्रमाधिकरणागतस्य लिङ्गाच्चेति सूत्रस्यार्थोस्त्विति । तदति-तुच्छम् । नहि वेदोपक्रमाधिकरणविषयवाक्यान्निगदाधिकरण-विषयवाक्यं भिन्नं येनोभयत्र पाठभेदः शक्येतापि । कथं तर्हि निगदा-धिकरणे *निगदोवा चतुर्थः स्याद्धर्मविशेषादिति* सूत्रेणाग्नीदग्नी-न्विहर बर्हिस्तृणीहीत्यादिपरप्रेषणरूपं निगदश्चतुर्थमन्त्रजातं स्याद्ध नृक्सामरूपस्य तस्योपांशु यजुषोच्चैर्निगदेनेति धर्मान्यत्वेन यजुर्जा-तादपि भिन्नत्वादिति पूर्वपक्षितम् । न हि वेदोपक्रमाधिकरणवि-षयवाक्य उपांशुत्वं यजुर्जातधर्मः येन धर्मान्यत्वे हेतुः सिद्धवदुपादी-येतेति चेत्सत्यम् । वेदोपक्रमाधिकरणपूर्वपक्षरीत्योपांशुत्वं यजुर्जातध-र्म इत्युपेत्य स हेतुरुक्तः । उक्तं हि न्यायसुधायां निगदाधिकरणे वे-दो वा प्रायदर्शनादित्यत्रोच्चैस्त्वोपांशुत्वयोर्वेदधर्मत्वे वक्ष्यमाणेपि तत्र-स्थपूर्वपक्षे स्थित्वोपांशुत्वस्य यजुर्जातधर्मत्वेनोच्चैस्त्वस्य तदन्यतोक्ते-ति तत्रैव व्यपदेशाच्चेति द्वितीयस्य पूर्वपक्षसूत्रस्यापि प्रयोजनमुक्त-म् । धर्मान्यत्वस्य तार्तीयवाक्याधिकरणविरुद्धत्वेनाभ्युच्चयमात्र-त्वान्न मुख्यहेत्वभिधानार्थमिदं सूत्रमिति । ननु नयविवेके वेदोप-

क्रमाधिकरणविषयवाक्यान्निगदाधिकरणविषयवाक्यस्य भेदोऽप्युपगतः । सत्यं निगदाधिकरणभाष्ये उच्चैस्त्वादीनां मन्त्रधर्मत्वव्यवहारदर्शनात् तत्स्वारस्यानुरोधेन तत्र तद्भेदोऽप्युपगतः । ननु निगदोपक्रमाधिकरणविषयवाक्ययोः पाठभेदो ऽप्युपगतः प्रत्युत तद्भेददर्शनग्रन्थेनैव तयोः पाठभेदोऽप्युद्घाटितः तत्र ह्युच्चैष्ट्वादीनां निगदाधिकरणे मन्त्रधर्मत्वमुक्तं वेदोपक्रमाधिकरणे वेदधर्मत्वमिति विरोध इति शङ्कायां वेदोपक्रमवाक्यान्निगदाधिकरणविषयवाक्यान्तरतया तत्समाधानमुखेन तयोर्भेदः प्रदर्शितः । एवमभेदभ्रान्तिमूलविरोधशङ्काया भेदप्रदर्शनेन निरसनं पाठभेदमेव व्यवस्थापयति पाठभेदभ्रमायोगात् । वेदोपक्रमाधिकरणवरदराजीयेपि तदधिकरणपूर्वपक्षरीत्या वेदोपक्रमवाक्यस्य मन्त्रधर्मस्वरविधायकत्वे निगदाधिकरणोदाहृतवाक्यान्तरमन्त्रधर्मस्वरसिद्धेरेतद्वैयर्थ्ये स्यादिति शङ्कया एतदधिकारान्वयपरं तदाश्रयान्वयपरमिति वैयर्थ्यपरिहारेण च पाठभेदः स्फुटीकृतः । न हि क्वचित्सामन्युच्चैष्ट्वविधिरन्यत्र नीचैस्त्वविधिरिति भेदे एकेनान्यस्य सिद्धार्थतया वैयर्थ्यशङ्कोन्मिषति । न वा विधेयभेदे एकमपूर्वान्वयबोधकमन्यदपूर्नीयमन्त्रविशेषान्वयबोधकमिति सार्थकत्वोपपादनं सङ्गच्छते इत्यलमतिविस्तरेण । तस्माद्वेदोपक्रमप्राबल्येनैव वेदधर्मत्वनिर्णयः ।

अश्वप्रतिग्रहेष्ट्यधिकरणेपि न पूर्वाधिकरणसिद्धकर्माङ्गत्ववशेन दातुरिष्टिरिति निर्णयः अन्योन्याश्रयापत्तेः । पूर्वाधिकरणे ह्येतदधिकरणसिद्धं दातु रिष्टिरित्यमुमर्थमवेक्ष्य कर्माङ्गत्वनिर्णयः । यदि ह्यृत्विजः प्रतिग्रहीतुरिष्टिः स्यात्तदा तस्याधिकारसिद्धये तद्गाम्येव फलं कल्पनीयमिति कथं यजमानगामि फलङ्कर्माङ्गत्वं भवेत् । अत एवोत्तराधिकरणन्यायेन दातुरिष्टिरिति स्थिते इदमधिकरणमारभ्यमिति भाष्यादिषु दर्शितम । ननु प्रतिग्रहीतुरिष्टिरिति पक्षेपि कर्माङ्गत्वं सिध्यति यजमानस्यापि द्वादशरात्रीर्दीक्षितो भूतिं वन्वीतेति विहितदक्षिणार्थद्रव्ययाचनरूपभूतिवनतप्राप्तेश्च प्रतिग्रहीतृत्वात् । यद्येवं न कर्माङ्गत्वेन दाननिमित्तेष्टिः सिध्यति । कर्ममध्ये प्रतिग्रहीतुर्यजमानस्य हयोसि मम भोगाय भवेत्यश्वप्रतिग्रहनिमित्तयामिष्टिः कर्माङ्गभूतेति वक्तुं शक्यत्वात् । वार्तिकेपि सालिङ्गादार्त्विजे स्यादिति सूत्रं व्याख्यातम् । कथं तर्हि मैत्रायणीयशाखायां दातुरिष्टि रिति भवि-

ष्यति । दातृविषयोपक्रमवशात्कर्माङ्गत्वेन सूत्रस्थलिङ्गपदङ्कर्मसामर्थ्यपरं व्याख्याय तत्रापरितोषेणैवोपक्रमप्राबल्यरूपवाक्यसामर्थ्यपरत्वेन सिद्धाया इष्टेः शाखान्तरेप्यभेदात्तत्रापि दातृविषया भविष्यति इत्येतदभिप्रायेणैवोक्तम् । तन्त्रसारे मैत्रायणीयशाखायामित्यादि यथाश्रुते प्रतिग्रहीतुरेव वा साभवतु । अत एव वार्तिके मैत्रायणीयशाखावाक्यमेवाधिकृत्योक्तम् ' यत्तु प्रतिग्रहीतुर्विधायकं तद्यदि तावत्कर्माङ्गत्ववशेन विनाप्युपक्रमविशेषात्पूर्ववाक्यानुसार्येव भवति ततस्तेनापि दातुरेव । अथतु स्वतन्त्रप्रतिगृह्णातिवशात्प्रतिग्रहीतुर्विधायकम् ततः प्रतिग्रहीतुः पूर्ववाक्याच्च दातुरित्युभौ कारिष्यत' इति तस्मान्न कर्माङ्गत्वेन दातुरिष्टिरिति निर्णयः नाप्यधिकारान्तराकल्पनालाघवेन प्रतिग्रहनिमित्तत्वेपि भूतिवचनप्राप्ताश्वप्रतिग्रहप्रयुक्तपौण्डरीकानुप्रवेशसम्भवेनाधिकारान्तरस्याकल्पनीयतया लाघवाविशेषात् । यत्तु भूतिवचनप्राप्ताश्वस्वीकरणस्यैवेदानसम्बन्धित्वाभावान्न प्रतिग्रहरूपमिति । तत्तुछम् । चन्द्रमसि मम भोगायभवेत्याह यथादैवतमेवैनाः प्रतिगृह्णातीति श्रुत्यैव तस्य प्रतिग्रहरूपतोक्तेर्गुर्वर्थनिवेशौषधार्थवृत्तिक्षीणयक्ष्यमाणाध्यापनाध्वसंयोगवैश्वजितेषु द्रव्यसम्भवभागो बाह्मर्वेदिभिक्षणमाणेष्विति स्मृतौ यज्ञार्थमर्थिने दानस्याप्यावश्यकत्वेन विहितत्वाच्च । गुरुणाप्यधिकारान्तरप्रसङ्गादिति न मूलयुक्तितयोक्तम् । अत एवोपक्रमतो दाननिमित्तताबुद्धौ विपरिवर्तमाना यथावभातितथावधारयितुं युक्तेत्यनन्तरो गुरुग्रन्थो मूलयुक्तिमाहेति दीपशिखायामवतारितः ।

यत्तु भाष्यकारमतानुरोधात्प्रतिग्रहीतुरियमिष्टिरस्त्वित्युक्तम् । तदयुक्तम् । तर्हि सा लिङ्गादार्त्विजे स्यादिति सूत्रानुरोधादार्त्विक्कर्मणि प्रतिग्रहे इयमिष्टिः नतु यजमानकर्मणि दाने इतियुक्तम् । नच तदुपपद्यते । ऋत्विक्प्रतिग्रहस्य निमित्तत्वेऽधिकारकल्पनावश्यम्भावेन यावतोश्वान्प्रतिगृह्णीयादित्यविशेषश्रवणाल्लौकिकप्रतिग्रहस्यापि निमित्तत्वदुर्वारतयर्त्विकप्रतिग्रहस्यैव निमित्तत्वमिति नियन्तुमशक्यत्वेन तेषां तत्सूत्रानुरोधलाभाभावात् पूर्वाधिकरणपूर्वोत्तरपक्षसूत्रद्वयानाञ्जस्यापत्तेश्च । तत्र * दोषात् त्विष्टिर्लौकिके स्याच्छास्त्राद्धि वैदिके न दोषः स्यादिति * सूत्रेणेयमिष्टिर्लौकिकेनिमित्ते-

ति पूर्वपक्षं कृत्वा * अर्थवादो वानुपपातात्तस्माद्यज्ञे प्रतीयेतेति * सूत्रेण वैदिकानिमित्तेति सिद्धान्तितं तद्दातुरिष्टिरित्येतदधिकरणसिद्धान्ताभ्युपगमे स्थिरप्यते येयं दातुरिष्टिः सा किं लौकिकेऽश्वदाने मित्तदायादादिभ्यः स्नेहाद्युपाधिना कृते न केसरिणो ददातीति प्रतिषिद्धे दोषनिर्घातार्था स्यादुत पौण्डरीकादिदक्षिणारूपाश्वदाने निमित्ते तदाननिमित्तकर्माङ्गभूतेति संशये वरुणग्रह(१)दोषश्रवणात्प्रतिषिद्धे लौकिके इयमिष्टिर्न वैदिके, अन्वहं द्वादशानि शतानि ददात्यश्वसहस्रमुत्तम इत्यादिविशेषविषयत्वेन दोषास्पृष्टत्वादिति प्राप्तौ लौकिकाश्वदातुर्वरुणग्रहशब्दितजलोदरव्याधिप्रादुर्भावस्याहृष्टत्वेन तन्निर्घातस्य फलत्वकल्पनायोगात् दोषश्रवणस्य साहश्यनिबन्धनावश्यकर्तव्यतापरार्थवादमात्रत्वान्न तदनुरोधेन लौकिके (२) किन्तु वैदिकया इष्टेर्वैदिकमेव निमित्तं बुद्धिस्थं भवतीति तदतिक्रमे कारणाभावात् वैदिके निमित्ते (३) नेयमिष्टिः। न च वाक्येन वैदिकत्वसामान्यस्य बुद्धिस्थत्वापादकतया सन्निधिलक्षणस्यारूपस्य बाधादश्वदानमात्रे निमित्ते सेयमिष्टिरास्त्विति शङ्क्यम। लौकिके पुरुषार्थत्वं वैदिके क्रतुशेषतेतिवैरूप्यापत्तेरिति सिद्धान्त इति प्रतिग्रहीतुरिष्टिरित्येतदधिकरणसिद्धान्ताभ्युपगमे तु किमेषा लौकिके प्रतिग्रहे वैदिकेवेति विचारपरं (४) वक्तव्यम। तत्र लौकिकत्वद्वैदिकस्याप्यृत्विक्प्रतिग्रहस्य विशेषविध्यभावेन नोभयतो दतः प्रतिगृह्णातीति दोषवत्वाच्छास्त्राद्वैदिके न दोषः स्यादिति न सङ्गच्छते। अतएव वैदिकस्य वेदविहितमेव निमित्तं बुद्धिस्थं भवतीति न्यायाप्रसरात् कर्माङ्गत्वहेत्वभावेन केवलं पुरुषार्था सती लौकिकेपि स्यादिति यज्ञइत्यपि न सङ्गच्छत। आर्त्विज इति ऋत्विजां सम्बन्धी यजमानः तस्मिन्दातरीयमिष्टिः स्यादित्यादिप्रकारेण वार्तिकएव योजितम। याज्ञकाः प्रतिग्रहीतुरेवेयमिष्टिरिति वदन्तीत्येतत्तु वयं न जानीमः। यदि च ते मैत्रायणीयशाखायां दा(५)तृप्रतिग्रहसद्भावात् ततः प्रति-

(१) ग्रहणेति खपु० पा०। (२) नेयमिष्टिरिति कपु० नास्ति।
(३) लौकिकं निमित्तं इति खपु० पा०।
(४) तदिति खपु० पा०।
(५) दातृप्रक्रमाभावादिति खपु० पा०।

ग्रहीतुरियमिष्टिरिति वदेयु स्तदा कोविरोधः । उक्तं हिवार्तिके । प्रतिग्रहीतरि स्पष्टं यदि वाक्यान्तरं तदा । भवेत्तस्यापि तेनेष्टिर्दातुस्तु न निवार्यते इति । प्राभाकरैः पौण्डरीके श्रूयत इति कृत्वाचिन्ता न दातुरिष्टिरिति सिद्धान्तसिद्धार्थमुक्ता किमुपक्रमबलाद्दातुरिष्टिरिति सिद्धावपि वैदिके दान इत्यनारभ्याधीतवाक्यान्न सिध्यति वैदिकस्य वैदिकमेव निमित्तमिति नियमस्य क्षामवत्यादिषु व्यभिचारेणासिद्धेः तत्सिद्धावपि क्रतुदक्षिणारूपाश्वदानं निमित्तमिति न सिद्ध्यति स्मृतिपुराणादिप्रसिद्धसूर्यप्राप्त्यादिफलकाश्वदानानामपि 'ये अश्वदाः सह ते सूर्येण'त्यादिवेदमूलानां सत्वात्तत्सिद्धावपि कर्माङ्गत्वं न सिध्यति क्रतुदक्षिणारूपस्याश्वदानस्याव्यभिचरितक्रतुसम्बन्धित्वेपि पर्णतावैषम्यात् पर्णतायाः शेषीभूतजुह्वन्वयप्रतीतेस्तद्वदपूर्वार्थत्वं, इह तु दान निमित्तत्वेन श्रुतं न शेषित्वेनाप्यन्वयार्हं निमित्ततया अन्वये मुख्यार्थता शेषितान्वये नियोगीयलक्षणेति वृत्तिद्वयासम्भवात् इत्यनुशयानैः कर्माङ्गत्वसिध्यर्थं(१)सोक्ता। नचकर्माङ्गत्वनिवृत्तावधिकारान्तरकल्पनायां प्रसक्तायां रात्रिसत्रवदार्थवादिकपापविमोकार्थिनोधिकारःकल्प्यः पापन्तु प्रतिगृहीतुरेव न दातुःयद्यपि प्रतिगृहीतुरपि यथाश्रुतार्थवादप्रतीति वरुणग्रहनिर्मोकफलकल्पनमशक्यं तथापि अश्रुतफलकल्पनातो वरमयोग्यांशत्वव्युदासेन पापापनयनमात्रस्य फलकल्पनमित्युपक्रमोपसंहाराभयसामञ्जस्यलाभात् प्रतिगृहीतुरेवेष्टिः स्यादिति दातुरिष्टिरिति सिद्धान्तसिद्ध्यर्थमेव सोक्तेति वाच्यम् । न केसरिणो ददातीति निषेधेन लौकिकाश्वदातुरपि पापसद्भावात् । नचायं विश्वजित्प्रकरणाम्नातत्वात्तत्रत्यसर्वस्वदानविधिशेषपर्युदासो न लौकिकाश्वदाननिषेध इति वाच्यम्। लौकिकाश्वदाननिषेधेन सम्भवाच्चरितार्थत्वे न केसरिवाक्येनान्यगतिकयेयजमाहवाक्यवद्गुणानाञ्च परार्थत्वादिति न्यायविरुद्धस्य गुणवाक्यं सत् गुणवाक्यान्तरशेष इत्यस्य कल्पयितुमशक्यत्वात् न केसरिणो ददाति नोभयतो दतःप्रतिगृह्णीयादिति सम्प्रतिपन्नपुरुषार्थविशेषसाहचर्येण पुरुषार्थपरत्वस्यैव प्रतीयमानत्वाच्चेत्यनुशयानैः तत्सिद्ध्यर्थं सोक्ता तस्मादिय-

---

(१) नोक्तेति खपु० पा० ।

मिष्टिर्दातुरेव उपक्रमानुसारेणैव च तथा सिद्धवनीत्यलं विस्तरेणायत्व-क्ताधिकरणसिद्धान्त(१)उपसंहारप्राबल्यनिर्वाह्य इत्युपक्रमप्राबल्यो-पगमे तद्विरोधापादनं तन्न। न तावदक्ताधिकरणविरोधः। त्रयो वेदा अजायन्तेत्युपक्रमे उपसंहारगतऋगादिविरोधिनां वेदानामिव अ-क्ता इत्युपक्रमे तद्गतविरोधिनां तैलादीनां प्रतीतेरभावात्। ननु त-त्र तैलादीनां शब्दतः प्रतीत्यभावेपि शब्दोपात्ताञ्जनक्रियाक्षिप्तद्र-व्यविशेषतया प्रतीतिरस्तीति चेन्न। अर्थवादश्रुतस्य घृतस्यैव त-त्साधनत्वेनान्वयसम्भवे आक्षेपानवतारात् शीघ्रप्रवर्त्तमानानराकाङ्क्षी-कृतेर्थे विलम्बितस्य श्रुतिविनियुक्तमन्त्रस्य विनियोगे मन्त्रलिङ्गस्येव अप्रवृत्तेः। यदि हि अर्थवादान्वयात् प्राग्विध्युद्देशः पर्यवस्येत् तदा तदाक्षिप्ततैलसाधननिर्णयादर्थवादस्तदनुरोधेन नेतव्यः स्यादपि न-त्वेवं, प्ररोचनां विना विधेः पर्यवसानासम्भवात् अनेनैवाशयेन प्ररोचनानपेक्षविध्यपर्यवसानं वार्तिके दर्शितम्। *समाप्यते विधिः कश्चित्कदा चिन्न प्ररोचितः। घृते प्ररोचनां दृष्ट्वा विधिस्तत्रानुमीयत इति* सान्दिग्धे तु वाक्यशेषादिति*सूत्रेप्यनेनैवाभिप्रायेण प्ररोचना-नपेक्षविध्यपर्यवसानं दर्शितम्। इदं सूत्रं न्यायसुधायामेवं व्याख्यातं अर्थाद्वा कल्पनैकदेशत्वादिति उत्तरसूत्रात्कल्पनैकदेशत्वादिति पद-द्वयमिहानुषञ्जनीयं तथाचायमर्थः सन्दिग्धेषु वाक्यशेषादर्थवादा-त्कल्पना घृतादेर्व्यवस्थयावधारणा एकदेशत्वात् एकोर्थो दिश्यते-प्रतिपाद्यते याभ्यां विध्यर्थवादाभ्यान्तावेकदेशौ तत्वात् विध्यर्थवा-दयोरेकार्थप्रतिपादकत्वात्। यदि हि अर्थवादान्वयं विना विद्ध्यु-द्देशः पर्यवस्येत् तदा, वाक्यैकवाक्यतयान्वयिनोर्थवादस्यान्वयात्प्रा-गेवार्थाक्षिप्तद्रक्द्रव्यविशेषकल्पनया निर्णये जाते पश्चात्तनार्थवादा-नर्थक्यपरिहाराय वैकृताङ्गवदन्यतराकाङ्क्षयार्थवादस्यान्वये सत्यपि-निर्णीतार्थत्यागायोगात् तदनुरोधेन अर्थवादस्यैव घृताघृतलक्षक-त्वं स्यादपि नत्वेवं, प्ररोचनाम्विना प्रवर्तकस्य विधेः पर्यवसानास-म्भवात्। तथाच शीघ्रप्रवृत्तिकप्रत्यक्षश्रुतिप्राप्ते घृतरूपविशेषे सति उपक्रमस्थेनापि द्रवद्रव्यसामान्येन तैलादिविशेषो नाक्षिप्यते नैराका-ङ्क्ष्यादिति नोपक्रमसामान्यश्रवणे वेदोपक्रमन्यायावतार इति।

(१) पुस्तकेषु तु सिद्धान्तोपसंहार इति पाठो दृश्यते।

ननु यदितैलादीनामाक्षेपतः प्रतीतिर्नास्ति तदा कोट्यन्तरानुपस्थित्या सन्देहायोगात्सूत्रे कथं सदिग्ध इत्युक्तम् । उच्यते अर्थवादापरामर्शदशायां विध्युद्देशमात्रपरामर्शिनः सम्भवत्यव्यवस्थितार्थप्रतीतिः घृततैलवसादीनामन्यतमं अञ्जनसाधनं भविष्यतीति सापि सन्देहग्रहणेन ग्रहीतुं शक्यते अनवधारणात्मकत्वाविशेषात् उक्तं च न्यायसुधायां सन्दिग्धशब्देनाव्यवस्थितार्थप्रतीतिरभिमतेत्यादि । ननु यद्युपक्रममात्रपर्यालोचनालब्धाव्यवस्थितार्थप्रतीतिरुपसंहारलब्धया घृतव्यवस्थया बाध्यते तर्हि सिद्धमुपसंहारप्राबल्यमिति चेत् । उच्यते । उपक्रमश्रुतार्थस्योपसंहारेणोपमर्दएव तत्प्राबल्यमापद्यते नतूपक्रमश्रुतार्थोपजीवनेन श्रुत्यन्तरापरामर्शिपुरुषबुद्धिकल्पितार्थस्य तेनोपमर्देपि, अन्यथा उद्भिदादिवाक्ये यागश्रवणात् घृतादीनामन्यतमिह द्रव्यमिति कल्पना अतिदेशप्राप्तसोमव्यवस्थया वारणीयेत्युपदेशादतिदेशः प्रबलः स्यात् । नन्वास्तामेवं प्रतिबन्दी तथापि सुहृद्भावेन पृच्छ(१)सि उपसंहारानुसारेणोपक्रमस्य सङ्कोचोऽयमेकदेशे बाधो भवत्येव कथं दुर्बलेन प्रबलबाध इति । नचोपक्रमे तैलादिविशेषाणामिव द्रवद्रव्यसामान्यविशेषस्याप्याक्षेपं विना प्रतीतेर्नास्ति सङ्कोच इति वाच्यम् । 'वासः परिधत्ते एतद्वै सर्वदैवत्यं वैवासो यत्क्षौमम्' इत्युदाहरणान्तरे उपक्रमे शब्दतः प्रतीतस्य वाससः सामान्यस्य उपसंहारानुसारेण सङ्कोचोपगमात् । नचार्थवादवाक्यानां पदैकवाक्यत्वाद्गामानय शुक्लामित्यत्र गोशब्दस्य शुक्लव्यक्ताविव कृष्णं वासः परिधत्ते इत्यत्र वासःशब्दस्य कृष्णव्यक्ताविव च विध्युद्देशोपात्तसामान्यस्यार्थवादोक्तविशेषपर्यवसानं युज्यत इति वाच्यम् । तत्र गोवासःशब्दोपात्तं सामान्यं विशेषयितुमेव शुक्लकृष्णशब्दसन्निधानमिति तदवैयर्थ्याय गोवासःश्रुतिसङ्कोचेपि प्रकृते सर्वदैवत्यस्तुत्यर्थक्षौमशब्दसन्निधानेन सङ्कोचायोगात् पदैकवाक्यतायामपि हि सन्निधिमात्रं न सङ्कोचकं दुर्बलेन सन्निधिना श्रुतिबाधानुपपत्तेः किंत्वनन्यार्थसन्निधिः स्वानर्थक्यपरिहाराय श्रुतिसङ्कोचकः आनर्थक्यप्रतिहतानां विपरीतं बलाबलमिति न्यायात् । यदि च पदैकवाक्यतायां सन्निधिमात्रं सङ्कोचकं भवेत् तदानीमश्वे-

(१) पृच्छामीति खपु० पा० ।

न गच्छति श्वेतेन पटेन प्रावृतइत्यत्र पटसम्बन्धनिराकाङ्क्षश्वेतशब्दसन्निधानेनापि श्रुतेः सङ्कोचः स्यात् तस्माद्वक्तव्यमिदं कथं दुर्बलेनोपसंहारेण प्रबलस्योपक्रमस्य सङ्कोचरूपो बाध इति। उच्यते। न प्रबलं प्रबलमित्येव दुर्बलोपस्थापितं निगृह्णाति किन्तु सति विरोधे। नचात्र दुर्बलस्याप्युपसंहारस्य उपक्रमेण विरोधः प्रत्युत तदाकाङ्क्षितसमर्पकतयानुगुण्यमेव अवश्यं हि अनुष्ठेयतया उपस्थाप्यमानं सामान्यं अनुष्ठानाय क्वचिद्विशेषपर्यवसानमपेक्षते निर्विशेषसामान्यस्य सकलविशेषाणां वा उपादातुमशक्यत्वात् तथा च क्व विशेषपर्यवसानमित्यपेक्षायां स यद्यपेक्षितो विशेषः कथमपि श्रुतो न लभ्यते तदाक्षेपकसामान्यबलात्तत्तदनुष्ठातृपुरुषबुद्ध्युपस्थापितं अनियतं विशेषमासाद्य निवृत्तः स्यात्तल्लाभे तु तत्रैव पर्यवसानं युक्तं कल्पितकल्प्योपस्थितयोर्विशेषयोः कल्पितोपस्थितिकल्प्यैव लाघवेन ग्राह्यत्वात्। नच वाक्यशेषस्य क्षौमादिग्रहणेपि तत्राप्यनुष्ठानाय विशेषाकाङ्क्षायामनियतविशेषकल्पनमावश्यकमिति वाच्यम। तथापि सर्वतो व्यावृत्ते व्यक्तिविशेषेऽनुष्ठानाय ग्राह्ये यावान्विशेषो वाक्यशेषे श्रुतो लभ्यते तावान् स एव ग्राह्यो बुद्धिलाघवादिति तदुपेक्षाकारणाभावात्। एवं च यद्युपक्रमस्य सङ्कोचोऽयमेकदेशबाध एव तथाप्यसौ तेनैवाकाङ्क्षितेनोपसंहारेण कारित इति न तेनास्य बाधः। एतेन अन्यार्थसन्निधानस्य सङ्कोचकत्वमयुक्तमिति निरस्तं सत्यामाकाङ्क्षायां तस्यापि सङ्कोचकत्वात् अत एवाग्नेय्या ऽऽग्नीध्रमुपतिष्ठत इत्यत्राग्नेयीश्रुतेः स्तोत्रादिकार्यान्तरार्थेन अग्न आयाहि वीतय इत्याद्याग्नेयीविशेषसन्निधानेन तत्परतया सङ्कोचोऽभ्युपेयते आग्नेय्या आग्नीध्रमुपतिष्ठत इत्यादिविधेः प्रकरणापादितसामान्यसम्बन्धानां सन्निहितानामाग्नेयीनामाग्नीध्रोपस्थापनात्मकविशेषसम्बन्धमात्रबोधने लाघवं अप्रकृतानामाग्नेयीनां ज्योतिष्टोमापूर्वीयत्वलक्षणसामान्यसम्बन्धोपि अनेनैव बोधनीय इति तद्विषयत्वे विधेर्गौरवमिति लाघवानुसारिणो विधेः सन्निहितास्वाकाङ्क्षादयात्। यद्यप्यग्न आयाहि वीतय इत्यादीनां प्रदेशान्तराम्नानेन सन्निधानं नास्ति तथापि ज्योतिष्टोमप्रकरणाम्नानं तावदस्ति तथा च यथा स्तोत्रादिकार्यान्तरार्थेन प्रकरणाम्नानेन विध्याकाङ्क्षया आग्नेयीश्रुतिसङ्कोचः तद्वदिहापि सामान्यश्रुति-

सङ्कोचः तदाकाङ्क्षया सन्निधानानुसारेण युक्तः आहत्यैव च सूत्रकारेणान्यार्थसान्निधानस्याकाङ्क्षावशाद्विशेषकत्वं षष्ठे वर्णितम । तत्र ह्येका देया षड् देयाश्चतुर्विंशतिर्देयाः शतं देयं सहस्रं देयमपरिमितं देयं इत्याधानदक्षिणाकल्पे भेदश्रुतावपरिमितशब्दो बहुत्वार्थकतया एकादिशब्दवद्दक्षिणाकल्पभेदपर इत्यपरिमाणे च शिष्टस्येत्यधिकरणनिर्णयानन्तरं सोपरिमितशब्दः किमनियतबहुत्वार्थः उत सहस्राधिकबहुत्वार्थ इति संशये दक्षिणाकल्पान्तरपरसहस्रसन्निधानेन विशेषणासम्भवादनियतबहुत्वार्थ * इत्यनियमो विशेषादिति * सूत्रेण पूर्वपक्षं कृत्वा अपरिमितशब्दस्य प्रतियोगिसापेक्षस्वभावबहुत्वार्थकत्वात्तदाकाङ्क्षया अन्यार्थसान्निधानमपि विशेषकमतः सन्निहितसहस्राधिकबहुत्वार्थ इति । * अधिकं वा स्यादबह्वर्थत्वादितरैः सन्निधानादिति * सूत्रेण सिद्धान्तितं यदैवं सर्वथैवानन्वयिनि विध्यन्तरे सन्निधानस्याप्याकाङ्क्षावशाद्विशेषकत्वं तदा किमु वक्तव्यं स्तावकत्वेनान्वयिन्यर्थवादे सन्निधानस्य तद्वशात् विशेषकत्वमिति तस्मात्साकाङ्क्षानुसारेण सङ्कोचो नोपसंहारेण बलात्कारित इति न तेन तस्य बाधः एवमेवोद्दिदा यजेतेत्यत्र यजिना सामान्यतः उपस्थापितस्य द्रव्यस्यानुष्ठानाय विशेषाकाङ्क्षानुरोधेनातिदेशिकसोमरूपविशेषपर्यवसानात्मकसङ्कोचोपि नातिदेशेन कारित इति न तेनोपदेशस्य बाधः अतएव दशमे अतिदेशादुपदेशस्य प्राबल्येन औपदेशिकशरादिनातिदेशिककुशादिबाधव्युत्पादनानन्तरं यत्र वायव्यं श्वेतमालभेतेत्यादौ औपदेशिकश्वेतादेरातिदेशिके छागादौ पर्यवसानं सम्भवति न तेन तस्य बलवतापि बाधनं किन्तु स्वाकाङ्क्षानुसारेण तत्रैव पर्यवसानमुक्तं *नैमित्तिके कार्यत्वात् प्राकृते स्यात्तदापत्ते*रिति सूत्रेण। यस्क कस्यचित् स्वयमनाकाङ्क्षित एव सङ्कोचो बलादन्येन कार्यते स एव तस्य तत्कृतो बाधः यथाहवनीयशास्त्रस्य पदशास्त्रेण, आहवनीये जुहोतीति शास्त्रेण न होमो विधीयते येन सकलहोमानां उपादातुमशक्यत्वात् स्वत एव विशेषाकाङ्क्षा स्यात् किन्त्विदं होमोद्देशेनावहवनीयं विदधाति तत्र चासङ्कोचेन सकलहोमानुवादः स्वरससिद्धः अनारभ्याधीतत्वात् शक्यते च यथाप्राप्तसकलहोमानुवादस्वारस्यानुरोधेन यो यदा होमः कर्तव्यत्वेन

प्राप्तः स सर्वोप्याहवनीये कर्तुं, ततश्चाहवनीयशास्त्रस्य स्वयमनाकाङ्क्षित एव सङ्कोचः पदे जुहोतीति शास्त्रेण कारित इति स तस्य तत्कृतो बाधः । एतेन सङ्कोचस्य बाधत्वाभावे वाक्यप्रकरणाधिकरणोक्तो वाक्येन प्रकरणस्य सङ्कोचोपि बाधो न स्यादिति श्रुतिलिङ्गादिषट्वलाबलव्यवस्थापि हीयेतेति परास्तम् । तत्रापि दर्शपूर्णमासप्रकरणस्याविशेषे प्राकरणिकसर्वपदार्थानां दर्शपूर्णमासोभयसाधारण्यापादने प्रवृत्तस्य स्वतः सङ्कोचाकाङ्क्षाविरहेपि अग्नीषोमाविदं हविरजुषेतां अवीवृधेतां महो ज्यायोक्रातामिति अत्र लिङ्गात्पौर्णमासमात्रान्वय्यग्नीषोमीयपदैकवाक्यतालक्षणवाक्यप्रमाणेन इदं हविरित्यादेः पौर्णमासमात्रसाधारण्यमापादयता कारिस्तदतिरिक्तविषयत्वलक्षणः सङ्कोच इति तस्य तत्कृतबाधत्वाभ्युपगमाच्छ्रुतिलिङ्गादिष्वपि यस्य स्वयमेवाकाङ्क्षितः सङ्कोचो न तत्कृतो बाधः यथोदाहृतः आग्नेय्यधिकरणे अपरिमिताधिकरणे च प्रकरणस्थानानुसारेण श्रुतिसङ्कोचः एवमन्यत्रापि भूयान्विषयः सुप्रसिद्धएव तस्मात्स्वत एवाकाङ्क्षितः सङ्कोचानुसारेण क्रियमाणोपि न तत्कृतो बाध इति नात्रोपसंहारेणोपक्रमस्य बाधः । उक्तं हि शास्त्रदीपिकायां अक्षाधिकरणे अवश्यं च यः कश्चिद्विशेष उपादातव्यः निर्विशेषसामान्येन व्यवहारासम्भवात् तत्रासति विशेषप्रमाणे यः कश्चित् स्यात् अस्तित्वत्र घृतस्य प्रमाणं वाक्यशेष इति । न्यायसुधाच्च यो वाक्यस्य सामान्यवचननोपक्रमः स निगमनवशेन श्रुत एव विशेषे व्यवस्थाप्यते तस्योपक्रमापेक्षितविशेषसमर्पणेन तदानुकूल्यादिति । नयविवेकेप्युक्तं उपक्रमापेक्षितविशेषसमर्पक एवात्रोपसंहारो नतु तद्बाधक इति । किञ्चोपक्रमस्याकाङ्क्षाभावेपि कांस्यभोजिन्यायादुपसंहारानुसारित्वं युक्तं कांस्यभोजिनयं हि चिन्तितं आग्रयणे ऐन्द्राग्नादीनि मुख्यानि हवींषि तेषां बर्हिः प्रसूनमप्रसूनं वेति न कश्चिन्नियमोस्ति द्यावापृथिव्य एककपालो जघन्यं हविः तस्य वैश्वदेव्यएककपालप्रकृतिकत्वात्प्रसूनं पुष्पितं बर्हिरिति नियमः प्राप्तः तत्र किमाग्रयणे ऐन्द्राग्नाद्यनुसारेणानियतं बर्हिर्ग्राह्यं उत द्यावापृथिव्यनुसारेण प्रसूनं बर्हिरिति संशये मुख्यत्वाद्बहुत्वाच्च ऐन्द्राग्नादीनां तदनुरोधादनियमप्राप्तौ जघन्यस्यापि द्यावापृथिव्यस्य धर्मः प्रसूननियम आदर्तव्यः प्रसूनोपादानेप्यैन्द्राग्ना-

दीनामवैगुण्यादनियमे द्यावापृथिव्यस्य वैगुण्यप्रसङ्गात् । यथाऽनियतपात्रभोजिनो गुरोर्नियतकांस्यभोजिनः शिष्यस्य च क्वचिदेकपात्रभोजनप्राप्तौ गुणभूतस्यापि शिष्यस्यानुरोधेन कांस्यपात्रनियमः आद्रियते तद्वत् तस्माद्राग्र्यणेषु पुष्पितमेव बर्हिरिति सिद्धान्त इति एवमिहापि निर्विशेषसामान्येन व्यवहारायोगादनियमेन यत्र क्वचिद्विशेषे पर्यवसानस्योपक्रमस्य घृतादिपर्यवसानेपि न क्वचिद्विरोधः घृतादिस्तुतेस्तु सामान्यस्तुतौ पर्यवसानेनाङ्गस्यमिति उपसंहारानुसारित्वं न्याय्यम् ।

वस्तुतस्तु अक्ताधिकरणे उपसंहारप्राबल्यशङ्कानिवारणाय नैतावदूरं वक्तव्यमस्ति विधौ सन्दिग्धमर्थवादेनावधार्यतइति हि तत्र व्युत्पादनं नतूपक्रमे सन्दिग्धमुपसंहारेणावधार्यतइति तत्र वाक्यशेषशब्दस्योपक्रमोपसंहारगतत्वानादरेणार्थवादमात्रपरत्वात् । यथोक्तं वार्तिके । विधिस्तुत्योस्समवृत्तिः समानविषयेष्यते । तस्मादेकत्र सन्दिग्धमितरेणावधार्यते इति । अत्र स्तुतौ सन्दिग्धं विधिनावधार्यत इति नावमिके अर्थैकत्वाधिकरणे भाष्यकारेण प्रदर्शितस्यार्थस्य दृष्टान्ततयोपादानम् । तत्र हि यदृचास्तूयते तदसुराअन्ववायन् यत्साम्ना स्तूयते तदसुरा अन्ववायन् इत्यत्र किमसुरागमनहेतुतया ऋक् निन्द्यते उत वशीकर्तुमशक्यानामसुराणामपि वशीकरणहेतुतया स्तूयत इति सन्दिग्धं तदनन्तरश्रुतेन य एवं विद्वान्साम्ना स्तुवीतेति सामविषयेण विधिनावधार्यते विधित्सितसामप्रशंसार्थमृक् निन्द्यत इति तन्निन्दापरत्वं एवं तदेकवाक्यत्वोपपत्तेरित्युक्तं विधौ सन्दिग्धं स्तुत्यावधार्यतइत्येतदधिकरणे व्युत्पाद्य कथनं अत्र यः प्रसिद्धसन्देहः यश्चाव्यवस्थितार्थप्रत्ययः तदुभयमपि सन्देहत्वेन विवक्षितं अनवधारणरूपत्वाविशेषात्सान्दिग्धामिति यदेव किञ्चन विधौ नावधृतं तत्सर्वं निर्दिश्यते यथोक्तं यववराहाधिकरणे वार्तिककृता सन्दिग्धेषुतु सर्वेषु वाक्यशेषेण निर्णयम् । वक्ष्यत्येवमतोनात्र पृथक्कार्या विचारणेति । तथा यत्र विधौ शब्दस्वरूपमेव प्रवृत्तितः प्रत्ययतो वा नावधार्यते शब्दनिश्चयेपि वा तस्य शक्यं नावधार्यते अनेकशक्यार्थनिर्णयेपि प्रकृते विवक्षितार्थो नावधार्यते अर्थावधारणेपि वचनव्यक्तिभेदो नावधार्यते तदवधारणेपि उद्देश्यमुपादेयं वा विशिष्य नावधार्यते तत्र सर्वत्रापि विशेषावधारण-

प्रत्ययः तदुभयमपि सन्देहत्वेन विवक्षितं अनवधारणरूपत्वाद्विशेषात्सन्दिग्धमिति च यदेव किञ्चन विधौ नावधृतं तत्सर्वं निर्दिश्यते । यथोक्तं यववराहाधिकरणे वार्तिककृता 'सन्दिग्धेषु तु सर्वेषु वाक्यशेषेण निर्णयम् । वक्ष्यत्येवमतोनात्र पृथक्कार्या विचारणेति' तथा च यत्र विधौ शब्दस्वरूपमेव प्रकृतितः प्रत्ययतो वा नावधार्यते शब्दनिश्चयेपि वा तस्य शक्यं नावधार्यते अनेकशक्यार्थनिर्णयेपि प्रकृते विवक्षितोर्थो नावधार्यते तथाऽर्थावधारणेपि वचनव्यक्तिभेदो नावधार्यते तदवधारणेपि उद्देश्यमुपादेयं वा विशिष्य नावधार्यते तत्र सर्वत्रापि विशेषावधारणसमर्थेनार्थवादेन यत्र तत्र स्थितेनापि विशेषावधारणमिह व्युत्पाद्यं तत्र 'आदित्यः प्रायणीय' इत्यत्र देवतातद्धितप्रकृतावस्ति सन्देहः किमादितिशब्द उत आदित्यशब्द इति 'दित्यदित्यादित्यपत्युत्तरपदाण्ण्यइति' ण्यप्रत्यये सति रूपस्योभयत्राप्यविशेषा 'ददित्यै चरुममुमेवादित्यं स्वेन भागधेयेनोपधावती'त्यादौ उभयोरपि देवतात्वेन वैदिकप्रसिध्यविशेषाच्च, स चादिति शब्द इति 'तेऽदित्या समध्रियन्त'इत्यर्थवादवशादवधार्यते। 'यदाग्नेयोऽष्टाकपालोऽमावास्यायां पौर्णमास्यां चाच्युतो भवति' इत्यत्र तद्धितप्रकृतिभूतोऽग्निशब्दः किमेवचनान्तः किं वा बहुवचनान्त इत्यस्ति सन्देहः 'अग्नये कृत्तिकाभ्य' इत्यादौ 'तस्मा अग्नयोद्रविणं दत्त्व'इत्यादौ देवतापराग्निशब्दस्योभयथापि दर्शनात्स एकवचनान्तः 'सोऽग्नयेऽधियत' इत्यर्थवादादवधार्यते । तथा 'तस्मा एतदादित्यं चरुं निर्वपे'दित्यत्रादित्यशब्दः किमेकवचनान्तो बहुवचनान्तो वेत्यस्ति सन्देहः 'अमुमेवादित्यमादित्येभ्यो भुवद्भद्रच' इत्यादौ उभयथापि दर्शनात्स बहुवचनान्तः 'आदित्यानेव स्वेन भागधेयेनोपधावति' इत्यर्थवादादवधार्यते । 'सारस्वतौ भवत' इत्यत्र किं तद्धितप्रकृतिः पुंलिङ्गः स्त्रीलिङ्गो वेत्यस्ति सन्देहः 'सरस्वत्यै चरुं सरस्वते चरु'मित्युभयोरपि देवतात्वप्रसिद्धेः तत्रैकः स्त्रीलिङ्गः अन्यः पुंलिङ्ग इति 'एतद्वै दैव्यं मिथुन'मित्यर्थवादादवधार्यते। 'यवमयश्चरुर्भवति' इत्यादौ यवशब्दशक्येऽस्ति सन्देहः दीर्घशूकः प्रियङ्गुर्वेति उभयत्र प्रयोगदर्शनात् 'यत्र अन्या ओषधयो म्लायन्ते अथैते मोदमाना इवोतिष्ठन्तीति'अर्थवादादीर्घशूक इति निर्णीयते । 'सोमारौद्रं चरुन्निर्वपे'दित्यत्र रुद्रशब्दार्थेऽस्ति सन्देहः अग्निः शिवो वेति, अग्निं प्रस्तुत्य 'सोऽरोदीद्यद्-

रोदीत्तद्रुद्रस्य रुद्रत्वमिति' श्रौतनिर्वचनेन 'रुद्रमग्निं द्विजाः प्राहुरिति' पौराणिकवचनेन च रुद्रशब्दस्य अग्निरर्थ इति अवगतम्। शिवं प्रस्तुत्या 'थ कस्मादुच्यते रुद्र' इत्यादिश्रौतनिर्वचनात् 'रुदू दुःखं दुःखहेतुर्वा तद्द्रावयति नः प्रभु' रित्यादिपौराणिकवचनाच्च प्रसिद्धिप्राचुर्याच्च शिवोर्थ इत्यवगतमिति नानार्थत्वात् 'सोमो वै रेतोधा अग्निः प्रजानां प्रजनयिता' इत्यर्थवादादग्निरित्यवगम्यते। ज्योतिष्टोमे अधिषवणफलके प्रकृत्य 'अथो खलु दीर्घसोमे सन्तृद्य धृत्या' इत्याम्नायते दीर्घसोम इत्यस्य वचनव्यक्ताधास्ति सन्देहः किं प्रकरणादु(१)त्कर्षालाभेन दीर्घस्य यजमानस्य सोमो ज्योतिष्टोम इति षष्ठीसमासरूपा वचनव्यक्तिः किं वा कर्मधारयबलीयस्त्वानुरोधेन ज्योतिष्टोमापेक्षया दीर्घे सोमे द्विरात्रादाविति कर्मधारयरूपा वचनव्यक्तिरित्यस्ति सन्देहः धृत्या इत्यर्थवादेन कर्मधारयरूपेति निश्चीयते दीर्घकाले हि सोमयागे पुनः पुनः ग्रावभिरभिहन्यमानायां सोमलतायामधिषवणफलकयोर्दारणशङ्कया तयोर्दार्ढ्यार्थं सन्तर्दनस्य परस्परसंश्लेषरूपस्य विधेर्धृत्यै धारणायेत्यर्थवादः सङ्गच्छते यजमानदैर्घ्येण दारणशङ्काभावान्न सङ्गच्छत इति। 'विवा एष इन्द्रियेण वीर्येणार्ध्यते यः सोमं वामिति यः सोमवामीस्यात् तस्मा एनं सोमेन्द्रं श्यामाक चरुं निर्वपे' दित्युद्देश्यभूते निमित्तेऽस्ति सन्देहः किं वैद्यकोक्तलौकिकसोमवमनं निमित्तं उत यागशेषरूपवैदिकसोमवमनमिति इन्द्रियवीर्यापचयरूपदोषश्रवणस्वरूपादर्थवादाद्वैदिकसोमवमनं निमित्तमवधार्यते। यद्यपि इन्द्रियवीर्यापचयो लौकिकसोमवमनेनापि भवति तथापि स तत्र न दोषः वैद्यके धातुसाम्योपयोगिशरीरान्तर्गतदोषनिःसारणाय वमनार्थमेव सोमपानं विहितं वमनं च क्रियमाणमिन्द्रियवीर्यापचयाविनाभूतमित्यङ्गीकृतग्लानित्वात् वेदे तु सोमपानं न वमनार्थं विहितं यागशेषप्रतिपत्तिरूपत्वात् प्रतिपत्तिश्च भक्षणरूपा सम्यग्जरणपर्यन्तेति लोकतो 'हिन्वमे गात्रा हरिव' इत्यादिमन्त्रलिङ्गाच्चावधारिता वमनेन व्यापद्यत इति वैदिकवमन एव स दोषः। तथा चतुरहे 'पुरस्तात्पौर्णमासे दीक्षेरन्निति' गवामयनिककालविधौ उद्देश्यकालेऽस्त्यव्यवस्थितप्रतीतिरूपः सन्देहः अनियमेन या का चित्पौर्ण-

(१) दनुत्कर्ष इति ख० पु० पा०।

मासीति 'तेषामेकाष्टकायां क्रयः सम्पद्यत' इति माघकृष्णाष्टम्यामेकाष्टकाशब्दवाच्यायां सोमक्रयसम्पत्तिवर्णनरूपादर्थवादान्माघीति निर्णीयते । एवं चातुर्मास्ये वैश्वदेववरुणप्रघाससाकमेधशुनासीरीयलक्षणपर्वचतुष्टयवति 'द्वयोः प्रणयन्तीति' द्वयोः पर्वणोरग्निप्रणयनविधावुद्देश्ययोः पर्वणोरस्त्यव्यवस्थितप्रतीतिरूपः सन्देहः अनियमेन ययोः कयोश्चिद्वयोः पर्वणोरिति 'तस्माद्वाभ्यां यन्ती'त्यर्थवादान्मध्यमयोरिति निश्चीयते 'ऊरुभ्यां हि लोके गच्छन्ति ऊरु संस्तुतं च मध्यमे पर्वणी ऊरु वा एतौ यज्ञस्य यद्वरुणप्रघासाः साकमेधाश्चेति' उपादेयविशेषनिर्णयस्त्वर्थवादादेवावाक्याः शर्करा इत्यादुदाहरणं । एवं यत्किञ्चिद्विधौ सन्दिग्धं तत्सर्वमुपक्रमोपसंहारगतत्वानादरेणार्थवादमात्रान्निर्णेयं इति व्युत्पादयितुं प्रवृत्तेऽस्मिन्नधिकरणे नोपसंहारप्राबल्यव्युत्पादनशङ्कावकाशः । यद्यप्येतेषु आदित्यः प्रायणीय इत्यारभ्योदाहृतेषु क्वचित्क्वचिदुपायान्तरेणापि निर्णयः सम्भवति तथाप्यर्थवादस्यापि निर्णयसामर्थ्यमविकलमेव ।

ननु यदि सर्वोप्यर्थवादात्सन्दिग्धार्थनिर्णयोत्रैव व्युत्पाद्यः किमर्थं तर्हि तृतीये सूत्रकारेणैव दीर्घसोम इत्यत्र षष्ठीसमास इति * कर्तृतोवा विशेषः स्यात तन्निमित्तत्वादिति* सूत्रेण पूर्वपक्षं कृत्वा* ऋतुतो ह्यर्थवादानुपपत्तेः स्यादिति* सूत्रेण कर्मधारय इति सिद्धान्ततम् । तत्रैव *पानव्यापच्च तद्वदिति* सूत्रेण लौकिकं सोमक्रयणं निमित्तमिति पूर्वपक्षं कृत्वा* दोषात्तु वैदिकं स्यादर्थाद्धि लौकिके न दोषः स्यादिति* सूत्रेण वैदिकं सोमक्रयणं निमित्तमिति सिद्धान्ततं । षष्ठे च गवामयनकालविधौ या काचित्पौर्णमासीति * पौर्णमास्यामनियमो विशेषादिति * सूत्रेण पूर्वपक्षं कृत्वा * माघीवैकाष्टकाश्रुतेरिति * सूत्रेण माघीति सिद्धान्ततम् । सप्तमे च * प्रथमोत्तमयोः प्रणयनमुत्तरवेदिप्रतिषेधादिति * सूत्रेण वैश्वदेवशुनासीरीययोः प्रणयनमिति पूर्वपक्षं कृत्वा * मध्यमयोर्वा गत्यर्थवादादिति* सूत्रेण वरुणप्रघाससाकमेधयोरिति सिद्धान्ततम् । उच्यते । सर्वविधस्यापि वाक्यशेषात्सन्दिग्धार्थनिर्णयस्याक्ताधिकरण एव सिद्धत्वेपि सन्तर्दनविधेः प्रकरणादनुत्कर्षलाभात् षष्ठीसमासाश्रयणं वरमित्यधिकशङ्कावारणाय दीर्घसोमवाक्यस्य पुनर्विचारः इन्द्रियवीर्योपचयरूपपुरुषसम्बन्धि-

दोषश्रवणं चरोः पुरुषार्थत्वे एवोपपद्यत इति तत्सिद्धये लौकिक-सोमवमनमेव निमित्तं वैदिकवमनस्य हि निमित्तत्वे हि चरोः क्रत्वर्थतया वमनेन क्रतुवैकल्यदोषः श्रूयते इत्यधिकाशङ्कानिरासाय वमनेष्टिवाक्यस्य पुनर्विचारः 'द्वादश पूर्णमास्यो द्वादशैकाष्टका' इति श्रुत्यन्तरे चैत्रादिमासगतासु द्वादशस्वपि कृष्णाष्टमीष्वेकाष्टकाशब्द-प्रसिद्धेर्नार्थवादवशेन माघीति निर्णय इत्यधिकाशङ्कावारणाय गवामयनकालविधिवाक्यस्य पुनर्विचारः 'न वैश्वदेव उत्तरवेदिमुपवयन्ति न शुनासीरीय' इति प्रथमोत्तमपर्वणोरुत्तरवेदिप्रतिषेधात् लिङ्गादग्निप्रणयनं तयोरेवेत्यधिकाशङ्कावारणाय प्रणयनवाक्यस्य पुनर्विचार इत्यादिष्वेवाधिकरणेषु स्पष्टम्। वस्तुस्थितिस्तावदियं यदुक्ताधिकरणे विधौ सन्दिग्धस्य यत्नतन्निष्ठितेनार्थवादेन निर्णयो व्युत्पादित इति तदतिलङ्घनेन तत्रोपसंहारप्राबल्योपजीवनोत्प्रेक्षायां तु ततोप्याङ्गस्येन तत्रोपक्रमप्राबल्योपजीवनमेवोत्प्रेक्षितुं शक्यं तथाहि अक्ताः शर्करा इत्यत्र विधिस्तुत्यारेकविषयतया यथोपक्रमावगत द्रवद्रव्यसामान्यस्य वाक्यशेषे घृतसङ्कीर्तनात् घृतरूपतयाऽस्ति सङ्कोचः तथा घृतस्य यज्ञान्तर्गताङ्गनक्रियासाधकद्रवद्रव्यविशेषतयाऽन्वयाददुष्टघृतरूपतयाऽस्ति सङ्कोचः जात्या संसर्गादिना वा दुष्टस्य घृतस्यायज्ञीयत्वात् एवं च यद्युपक्रमोपसंहारानुगतयोर्द्रवद्रव्यघृतयोरवशिष्टः सङ्कोचः तथाप्युपक्रमेऽनुष्ठेयतयाऽवगतस्य द्रवद्रव्यसामान्यस्यानुष्ठानाय स्वस्यैव विशेषाकाङ्क्षया सङ्कोच उपसंहारे तेजस्त्वेन स्तुतस्य घृतस्य तु न स्वाकाङ्क्षया सङ्कोचः घृतसामान्येऽप्यौज्वाल्यादिगुणतस्तेजस्त्वेन स्तुत्यविरोधात् किं तूपक्रमगताङ्गनक्रियासाधनद्रवद्रव्यविषयतयान्वयानुसारेणैवेत्येवं सुवचमुक्रमप्राबल्योपजीवनम् ।

नन्वक्ताधिकरणे सन्दिग्धार्थनिर्णाय इत्युपक्रमगतसामान्यस्योपसंहारानुसारेण सङ्कोचे तन्माभूदुदाहरणं तथाप्युदाहरणान्तरमस्त्येव, तथाहि ज्योतिष्टोमे * तुल्यान्यत्वविशिष्टं हि कारणमिति * चतुर्थोपान्त्याधिकरणे दीक्षणीयादीनामिष्टीनामग्नीषोमीयादीनां पशूनां सोमयागस्य च सन्निधौ 'ज्योतिष्टोमेन स्वर्गकामो यजेतेति' आम्नाते यजेः सन्निहितसर्वयागानुवादस्वारस्येन सर्वेषामेव तेषां फलसम्बन्धप्रतीतावपि बा-

क्यशेषे 'त्रिवृत्पञ्चदशः सप्तदश एकविंश एतानि वाव तानि ज्योतींषि य एतस्य स्तोमा' इति ज्योतिःशब्दितत्रिवृदादिस्तोमसम्बन्धिनः सोमयागस्य विशिष्य कीर्तनात् तत्रैव यजेः पर्यवसानमिति सोमयागस्यैव फलसम्बन्धः इतरेषां तु फलवदफलन्यायेन तदङ्गत्वमिति निर्णीतं अत्र ह्युपक्रमे नास्ति स्वतः सन्देहः दीक्षणीयादयः फलसम्बन्धिनः सोमयागे वेति, नाप्यनवस्थितप्रतीतिरस्ति दीक्षणीयादिसोमयागान्तानां मध्ये अनियमेन कश्चिदेव फलसम्बन्धीति अत एव फलार्थमनुष्ठानाय को याग उपादातव्य इति विशेषाकाङ्क्षापि नास्ति सन्निहितसर्वयागानामसङ्कोचेन राजसूयवाक्य इव फलसम्बन्धित्वोपपत्तेः 'राजसूयेन स्वाराज्यकामो यजेत'इत्यत्र यजेः सन्निहितसर्वयागानुवादस्वारस्यानुरोधेन सन्निहितानामनुमत्यादीनामिष्टीनां मल्हादीनां पशूनां पवित्रादीनां क्रतूनां सोमयागादीनां चाविशेषेण फलसम्बन्धाभ्युपगमात् तथापि यदत्र वाक्यशेषानुसारेण सङ्कोचकल्पनं तदुपसंहारप्राबल्येनैव । एवं नवमे * पत्नीसंयाजान्तत्वं सर्वेषामविशेषा * दित्यधिकरणे द्वादशाहे श्रुतस्य 'पत्नीसंयाजान्तान्यहानि सन्तिष्ठन्ते' इत्यविशेषेण सर्वेषां सौत्यानामह्नां पत्नीसंयाजान्तत्वविधेरसंस्थितो हि तर्हि यज्ञ इति क्रतोरसमाप्तिप्रतिपादकवाक्यशेषानुसारेण येष्वहःसु क्रतोरपरिसमाप्तिस्तेषामेकादशानामेव अह्नां पत्नीसंयाजान्तत्वविधायकमिति यन्निश्चितं तदप्युपसंहारप्राबल्येनैव, तदभावे सर्वेषामह्नां पत्नीसंयाजान्तत्वसम्भवेन असन्दिग्धत्वोपक्रमस्य सङ्कोचकल्पनायोगात् । स्यादेतत् सामान्यविधेर्विशेषसङ्कीर्तने सति *सप्तदश्यवत्तदुपसंहारो न्याय्य * इत्यधिकरणद्वयेपि वाक्यशेषानुसरणं न तूपसंहारभागप्राबल्येन न हि 'सप्तदश सामिधेनीरनुब्रूया'दित्यनारभ्याधीतस्य सामिधेनीसाप्तदश्यविधेः पाञ्चदश्यावरुद्धायां प्रकृतौ निवेशमलभमानतया विकृतिगामित्वे वक्तव्ये विशेषाश्रवणात्सामान्यतः सर्वविकृतिगामित्वेन प्रतीयमानस्य श्रुतसाप्तदश्यासु मित्रविन्दादिषु यदुपसंहरणं तदुपसंहारभागप्राबल्यप्रयुक्तं अनारभ्याधीतस्य मित्रविन्दादिगतस्य च साप्तदश्यविधेरकाङ्क्षाज्ञानाभावेनोपक्रमोपसंहारभावाभावादिति चेत् । मैवम् । अनारभ्याधीतस्य साप्तदश्यस्य विशेषोपसंहारो न विशेषसङ्कीर्तनमा-

त्रात्किन्त्वस्पष्टत्वात् तथाहि सामिधेनीनां सान्नदृश्यं अनारभ्याधीतवादेनोक्तं तद्यावत्सामिधेनीद्वारा सर्वविकृत्यर्थत्वं कल्पयितुमुपक्रम्यते तावदेव मित्रविन्दादिषु प्राकरणिकेन वाक्येन क्रतुविशेषसम्बन्धे कृते क्षीणाऽर्थापत्तेर्न क्रत्वन्तरसम्बन्धं कल्पयतीति अस्पष्टक्रतुसम्बन्धात्सान्नदृश्यस्योपसंहारः नेह तथा त्रिधावस्पष्टः क्रतुसम्बन्धोवाक्यशेषस्पष्ट इति विशेषोस्ति अतो नात्रोपसंहारन्यायः प्रवर्तते अत एव *अभावादतिरात्रेषु गृह्यत* इति दार्शमिकेऽधिकरणे 'उत्तरेहन् द्विरात्रस्य गृह्यत' इत्यनारभ्याधीतवाक्येन सामान्यतो द्विरात्राणामुत्तरेऽहनि षोडशिग्रहणविधानस्याऽऽङ्गिरसां द्विरात्रप्रकरणे 'वैखानसं पूर्वेहन्त्साम भवति षोडश्युत्तर' इति विशेषसङ्कीर्तनेनाङ्गिरसां द्विरात्र उपसंहारमाशङ्क्यानारभ्यमानेन षोडशिग्रहस्य सामान्यतः सर्वद्विरात्रक्रतुसम्बन्धस्य स्पष्टत्वान्न तस्योपसंहारो युक्त इति प्राकरणिकं वाक्यं वैखानसवि(१)शेषार्थवादमात्रमित्युक्तम् । उक्तं च वार्तिके सामान्यविधिरस्पष्टः संह्रियेत विशेषतः । स्पष्टस्य तु विधेर्नान्यैरुपसंहारसम्भव इति । अन्यथा न ब्राह्मणं हन्यादिति सामान्यनिषेधस्यापि नात्रेयं हन्यादिति विशेषोपसंहारः कल्प्येतायदि तु स्पष्टस्यापि क्वचिदुपसंहार इष्यते तथापि यत्र नान्यथासिद्धं विशेषसङ्कीर्तनमस्ति तत्रैव तदुपसंहारः अन्यथा 'यत्किञ्चित्प्राचीनमग्नीषोमीयात्तेनोपांशु चरन्तीति' सामान्यतोऽग्नीषोमीयात्प्राचीनेषु उपांशुत्वविधेरपि 'यावत्या वाचा कामयीत तावत्या दीक्षणीयायामनुब्रूयान्मन्द्रं प्रायणीयायां मन्द्रतरमातिथ्यायामुपांशूपसत्स्विति' श्रवणादुपसन्मात्र उपसंहारः प्रसज्येत । न च यत्किञ्चिदिति वीप्सानुसारेणानुपसंहारः उपसदां साकल्यमादायापि वीप्सोपपत्तेः तस्माद्यथा तत्रोपांशूपसत्स्वित्यत्र सामान्यवचनप्राप्तमुपांशुत्वमवलम्ब्य दीक्षणीयादिस्वरान्तरविधानप्रशंसार्थत्वेनार्थवत्वोपपत्तेर्नोपसंहारकत्वं तद्वदिहाप्यर्थवादरूपस्य वाक्यशेषस्य यथाकथञ्चित्तावकत्वसम्भवेनान्यथासिद्धस्य नोपसंहारकत्वं न्याय्यमित्युपसंहारभागप्राबल्यानुसरणमेवाख्येयम । अत एव विशेषनिष्ठस्याप्युपक्रमस्योपसंहारानुसारेण सामान्यपरत्वमभ्युपगतं लक्ष्यते तत्सिद्धि-

(१) विरोधिशेष इति ख० पु० पा० ।

पेटिकयां तत्र हि 'सृष्टीरुपदधातीत्यत्र' सृष्टिशब्दस्य 'तद्धानासामुपधानो मन्त्र इतीष्टकासु लुक्च मतो'रित्यनुशासनात् 'तिसृभिरस्तुवत ब्रह्मासृज्यत पञ्चभिरस्तुवत भूतान्यसृज्यन्ते' त्यादिसृष्टिलिङ्गमन्त्रोपधेयेष्टकार्थकस्य 'एकयाऽस्तुवत प्रजा अधीयन्ते' त्याद्यनुवाकोक्तसृष्टिलिङ्गकासृष्टिलिङ्गकमन्त्रोपधेयानामिष्टकानां प्रत्येकं स्तुतिं कृत्वा 'यत्सप्तदशेष्टका उपदधाति' इत्युपसंहारानुसारेण तदनुवाकाम्नातसृष्टिलिङ्गकासृष्टिलिङ्गकमन्त्रोपधेयानामिष्टकानां समुदाये सामान्यरूपेण लक्षणाऽऽङ्गीकृतेति । अत्रोच्यते । ज्योतिष्टोमाधिकरणे तावदुपसंहारानुसरणमुपक्रमाकाङ्क्षयैव उपक्रमश्रुतस्य ज्योतिष्टोमनाम्नोहि यागं प्रवर्तमानस्य किञ्चित्प्रवृत्तिनिमित्तमाकाङ्क्षितं न च तदाकाङ्क्षितं समर्पयति वाक्यशेषे तदवधीर्य ज्योतिषामग्नीनां स्तोमः समूहो यस्मिन्नित्यादिदीक्षणीयाद्यनुवृत्तं किञ्चित्पुरुषबुद्ध्या कल्पयितुं युक्तं वाक्यशेषे च सोमयागगतमेव प्रवृत्तिनिमित्तं समर्पयति ज्योतिःशब्दितत्रिवृदादिस्तोत्रसम्बन्धस्य 'अहं वा गृहीत्वा चमसं वोन्नीय स्तोत्रमुपाकुर्यादिति' वाक्यान्तरे सोमयाग एव निर्ज्ञातत्वात् अतो यत्र वाक्यशेषस्तत्र ज्योतिष्टोमनाम यत्र च तत् तत्र यजिः क्लृप्तप्रवृत्तिनिमित्तनामपरतन्त्रत्वादाख्यातस्येति उपक्रमाकाङ्क्षानुसृतोपसंहारकारितः सङ्कोचः नोपसंहारप्राबल्यकारितः अत एव यत्रोपक्रमस्य नाकाङ्क्षा न तत्र सत्यप्युपसंहारे विशेषसङ्कीर्तनेन तदनुसारेणोपक्रमस्य सङ्कोचः उपेयते यथा 'एष वाव प्रथमो यज्ञो यज्ञानां यत् ज्योतिष्टोमो य एतेना निष्ट्वाऽन्येन यजेत' इत्यत्रान्यशब्दस्य 'योहि त्रिवृदन्यं यज्ञक्रतुमापद्यते सतं दीपयति, यः पञ्चदशः स तं यः सप्तदशः स तं य एकविंशः स तं' इति त्रिवृदाद्येकस्तोमक्रतुसङ्कीर्तनेपि न तद्विषयतया सङ्कोच उपेयते उपक्रमस्य आकाङ्क्षाविरहेप्युपसंहारप्राबल्यादेव तदर्पितविशेषपर्यवसानमभ्युपगच्छतः तत्राप्यन्यशब्दस्य त्रिवृदाद्येकैकस्तोमक्रतुमात्रपरत्वं त्रिवृदादिचतुष्टयान्तर्गतस्तोमयुक्तक्रतुमात्रपरत्वं वा स्यादिति तेषामेव ज्योतिष्टोमपाञ्चात्यत्वनियमः सिध्येत् । त्रिवृदादिस्तोमचतुष्टयसम्बन्धरहितानां चतुष्टोमपञ्चविंशाग्निष्टोमादीनां ज्योतिष्टोमात्पूर्वमप्यनुष्ठानं स्यात् । नचेष्टापत्तिः पञ्चमे * एकस्तोमे वा क्रतुसंयोगात्सर्वेषां वा चोदकाविशेषाप्रशंसास्तोमानामिति *

पूर्वोत्तरपक्षसूत्राभ्यां सूत्रकृतैव वाक्यशेषानुसारेण सङ्कोचनिरासात् तस्मादुपसंहारप्राबल्यवादिनस्तत्रापि सङ्कोचः स्यात् उपक्रमाकाङ्क्षाया अतन्त्रत्वादिति तदधिकरणविरोधो वज्रलेपायितः। नावमिकाधिकरणेतु उपसंहारानुसरणमसिद्धमनपेक्ष्योपसंहारं विध्युद्देशपर्यालोचनयैव प्रागुक्तमादग्हः पत्नीसंयाजान्तविधिरिति सिद्धेः। तथाहि 'द्वादशाहेन प्रजाकामं याजयेदि'ति द्वादशसोमयागाः सह कार्यत्वेन विहिताः तत्र तेषां सहत्वसिद्धये पूर्वं पूर्वमहः क्वचित्पदार्थेऽवस्थाप्य परं परमुपक्रमितव्यं तत्रानियमेन यत्र क्वचनपदार्थेऽवस्थापने प्राप्ते पत्नीसंयाजान्तानि पूर्वपूर्वाण्यहानि कृत्वोत्तरमुत्तरमारभेतेत्येवं एकादशानामन्हां पत्नीसंयाजान्तत्वविधौ नियमविधिर्भवति उत्तरमस्यान्हः पत्नीसंयाजान्तत्वविधौ त्वत्यन्ताप्राप्तविधिः स्यात् अप्राप्तविधानाच्च नियमविधानं बलीयः विधिलाघवात् अतो विशेषश्रवणाभावेपि पत्नीसंयाजान्तत्वविधिः प्रागुक्तमादग्ह इति सिध्यति किमत्रोपसंहारानुसरणेन । अत एवोपांशु यजुषेति वाक्यं निगदाधिकरणोदाहृतं वेदोपक्रमाभावात् मन्त्रविशेषस्य यजुषः उपांशुत्वविधायकमिति मन्यमानैर्यजुषेत्यविशेषश्रवणेपि विशेषोपस्थापकोपसंहाराभावेपि नियमविधिबलीयस्त्वादेव निगदातिरिक्तस्य यजुषोयं उपांशुत्वविधिरिति दर्शितं निगदाधिकरणे यत्रानियमेनोपांशुत्वं प्राप्तं तत्र नियममात्रं उपांशु यजुषेत्यनेन क्रियते निगदव्यतिरिक्तेष्वेव यजुष्षु येन केन चित्स्वरेण कार्यसिद्धेरुपांशुत्वानियमाप्राप्तिरिति तद्विषयमेवेदं वचनं निगदेषु प्रोक्षणीरासादयेत्यादिषु परसम्बोधनलक्षणकार्यवशेन उच्चैष्टुमेव प्राप्तं न पक्षेऽप्युपांशुत्वमिति न तत्रास्य वचनस्य व्यापारः एवं चार्थतः प्राप्ते उच्चैष्टुं उच्चैर्निगदेनेत्यनुवादमात्रमिति तेषामर्थाधिकरणे च व्रीहीनवहन्तीत्यत्र व्रीहिपदस्यापूर्वसाधनमात्रपरत्वेपि नावघातस्याज्यसाध्यसाधारण्यं तत्रावघातस्य पक्षे प्राप्त्यभावेन अत्यन्ताप्राप्तविधानतो विधिगौरवापत्तेरिति व्रीहियवमात्रविषयत्वं नियमविधिबलीयस्त्वादाश्रितम्। किं च तत्रैवाधिकरणे व्रीहियवाभ्यां वैतुष्यार्थं अवघातोऽपेक्षितः नाज्यसान्नाय्याभ्यामित्यपेक्षितविधेरनपेक्षितविधानदौर्बल्यन्यायेनाप्यवघातस्य औषधद्रव्यमात्रशेषत्वं दर्शितं तद्वदिहाप्येकादशभिरहोभिः सहत्वसिद्धये पत्नीसंयाजान्तत्वमपेक्षितं नोत्तमे-

मान्हेति तेनापि न्यायेन प्रागुत्तमादन्हः पत्नीसंयाजान्तत्वविधिरिति सिध्यति अतस्तत्र वाक्यशेषानुग्रहोऽभ्युच्चयमात्रमिति तत्रैवाधिकरणे स्फुटम् । यत्तु 'सृष्टीरुपदधाती'त्यत्र उपसंहारानुसारेण समुदायलक्षणाश्रयणं तदानर्थक्यप्रतिहतानां विपरीतं बलाबलमिति न्यायात् बहुबाधादल्पबाधो वरमिति न्यायाच्च तल्लक्षणानाश्रयणे हि प्रत्येकमसृष्टिलिङ्गकमन्त्रोपधेयेष्टकास्तुतीनामिष्टकासाहचर्यकीर्तनस्य च सर्वथा बाधः स्यात् ततो वरमेकस्य सृष्टिशब्दस्य लक्षणेति तस्मात्सामान्यविशेषविषययोरुपक्रमोपसंहारयोरुपसंहारानुसरणेन तत्प्राबल्यवर्णनमयुक्तम् । एतेन च्छागपशुन्यायोदाहरणमपि निराकृतं तत्राप्यनुष्ठानाय विधेर्विशेषाकाङ्क्ष्यैव मन्त्रार्पितविशेषे पर्यवसानाभ्युपगमात् ।

नन्वर्थवादान्वयं विना विधेरपर्यवसानात्तदर्पितविशेषग्रहणमयुक्तं मन्त्रार्पितविशेषग्रहणं तु कथं स्यात् तदन्वयात्प्रागेवानियतविशेषकल्पनया विधिपर्यवसानसम्भवादिति चेन्न । पर्यवसितस्यापि विधेःप्रत्यक्षविशेषे सत्याक्षेपायोगाद्विधिमन्त्रयोरेकविषयत्वनियमात् पशुत्वसामान्यस्य कृत्स्नस्य च्छागे सद्भावाविरोधेन कांस्यभोजनन्यायावतारानियमसम्भवे अनियमानुपपत्तेश्च मन्त्रार्पितविशेषग्राहकत्वात् । अत एव स्थितेऽप्यकाधिकरणेऽप्यपर्यवसितं सामान्यं श्रुतविशेषे पर्यवस्यतु पर्यवसितं तु न सङ्कोचनीयमित्यधिकाशङ्कायां छागपशुन्यायावतारः दृष्टं च पर्यवसितस्यापि अग्निहोत्रं जुहोतीति(१)विधेरनियतद्रव्यदेवताक्षेपं विना 'पयसा जुहोति यदग्नये च प्रजापतये च सायं जुहोतीति' वाक्यान्तरविधेयद्रव्यदेवताग्राहकत्वं अन्यथा तत्राप्याक्षेपेणानियतद्रव्यविशेषादिकल्पनयैव पर्यवसानात् उत्पत्तिशिष्टगुणावरोधन्यायेन वाक्यान्तरविधेयद्रव्यविशेषान्वयो न स्यात् तस्मात्तद्वदेव श्रुतविशेषे सत्याक्षेपानवतारात्तदाकाङ्क्ष्यैव मन्त्रार्पितविशेषपर्यवसानं नोपसंहारप्राबल्यात् । यदि च 'योदीक्षितो यदग्नीषोमीयं पशुमालभेत' इत्ययं विधिः स्वाकाङ्क्षया विना उपसंहारप्राबल्यादेव पशुसामान्यं परित्यज्य मन्त्रार्पितं छागं द्रव्यतया गृह्णीयात् तदाऽग्नीषोमावपि परित्यज्य 'त्वं ह्यग्ने प्रथमो मनोतेति' मनोतामन्त्रार्पितं

(१) जुहोतीत्यादि इति पु० पा० ।

'उपनयत मेध्यादुर आशासाना मेधपतये मेध'मित्य(१)धिगुप्रैषगतदेतापदैकवचनान्तमेधपतिशब्दोपोदबलितश्च केवलाग्निमेव देवतात्वेन गृह्णीयात् । नचेष्टापत्तिः दशमे मनोताधिकरणे मनोतामन्त्रस्थाग्निशब्दस्यैकदेशद्वारागनीषोमप्रकाशकत्वस्य नवमे मेधपत्यधिकरणे मेधपतय इत्येकवचनस्याग्नीषोमोभयव्यासक्तदेवतैक्याभिप्रायत्वस्य च समर्थितत्वात् । न च मनोतामन्त्रे केवलाग्निशब्दप्रयोगेऽप्यग्नीषोमाभ्यां च्छागस्येत्यादिमन्त्रान्तरेष्वग्नीषोमपदप्रयोगात् मेधपतिशब्दस्य क्वचिच्छाखायामेकवचनान्तपाठेपि शाखान्तरे द्विवचनान्तपाठाच्च विध्यनुगुणमन्त्रसद्भावे तदनुगुणमन्त्रार्पितग्रहणमपि नोपेयत इति वाच्यम् । तथा सति द्रव्यविषयेपि 'इमं पशुं पशुपते ते अद्य' 'पाशात्पशुं प्रमुञ्चते' त्याद्यनुगुणमन्त्रसद्भावादननुगुणमन्त्रार्पितच्छागग्रहणमपि न स्यात् तस्माद्देवताविषये आकाङ्क्षाविरहान्मन्त्रार्पितस्याग्रहणं द्रव्यविषये तत्सत्वान्मन्त्रार्पितस्य ग्रहणमित्येव विशेषो वक्तव्यः । अत एव 'व्रीहिभिर्यजेतेति' विधे' र्धान्यमसीति' मन्त्रार्पितसामान्यग्र (२) हणमनुष्ठानाय विशेषाकाङ्क्षाया इव सामान्याकाङ्क्षाया विरहात् अयुक्तश्चाकाङ्क्षाभावे पदार्थस्य मन्त्रानुसारेण सङ्कोचः मन्त्रोह्यनुष्ठानकाले पदार्थं प्रकाशयन् पदार्थशेषः न च शेषानुसारेण शेषिसङ्कोचो युक्तः अन्यथा 'स्योनं ते सदनं करोमि घृतस्य धारया सुशेवं कल्पयामि । तस्मिन्त्सीदामृते प्रतितिष्ठ व्रीहीणां मेध सुमनस्यमान' इति व्रीहिलिङ्गकमन्त्रानुसारेण सदनकरणप्रतिष्टापन व्रीहिपुरोडाशे सङ्कुचिते कल्पनीय इति यवपुरोडाशे ते न स्यातां तस्माद्यथा गुणानुसारेण प्रधानसङ्कोचायोद्यवपक्षेपि सदनकारणप्रतिष्टापने मन्त्रः परं व्रीहिपक्ष इति व्यवस्था तथात्रापि सर्वेपि पशवो द्रव्याणि मन्त्रः परं छागपक्ष इत्येव स्यात् यदि विध्यर्थाकाङ्क्षानुसरणं न स्यात् निराकृतश्च साक्षादिन्द्रपीताधिकरणे निराकाङ्क्षस्य विधेर्मन्त्रलिङ्गानुसारेण सङ्कोचः तत्र हि सोमेन यजेतेत्यत्राविशेषेण ऐन्द्रानैन्द्रप्रदानरूपसर्वाभ्यासानुवृत्तज्योतिष्टोमयागाङ्गत्वेन

---

(१) सामान्याग्रहणमिति पु० पा० ।

(२) मित्यग्निमप्रेषगतदेवतापरैक इति पा० पु० ।

विहितस्य सोमद्रव्यस्य 'इन्द्राय त्वा वृत्रघ्ने इन्द्राय त्वा वसुमते सोमं गृह्णामीति' मानग्रहणमन्त्रानुसारेणैन्द्रप्रदानविषयतया सङ्कोचमाशङ्क्य गुणानुसारेण प्रधानसङ्कोचो न युक्तः कामं मन्त्र ऐन्द्रविषयः स्यादिति व्यवस्थापितम् । निराकाङ्क्षस्यापि विधेरुपसंहारप्राबल्येन सङ्कोचमभ्युपगच्छतस्तत्रापि सङ्कोचः स्यात् इति तदधिकरणविरोधो वज्रलेपायत इत्यलं विस्तरेण । किञ्च विधेर्मन्त्रानुसारेण पर्यवसानाभ्यु(१)पगमेपि न तत उपसंहारप्राबल्यं मन्त्रस्य विध्युपसंहारत्वाभावादेकवाक्यतया पूर्वापरभावेनाम्नातयोर्हि उपक्रमोपसंहारभावः। न च विधिमन्त्रयोः पूर्वापरभावनियमोऽस्ति । न च यत्र तत्र स्थितस्यापि मन्त्रस्य विधिप्रापितानुष्ठेयप्रकाशकतया तदनुवादरूपतैव तदुपसंहारत्वमातथात्वे यथाप्राप्त्यनुवाद इति न्यायेन पुरोवादानुवादयोः पुरोवादस्य प्रबलतयोपक्रमस्य प्रावल्यमापतेदित्यनुवादस्योपसंहारत्वपरिभाषायाः स्वप्रतिकूलत्वादिति दिक् ।

यत्तु श्येनवाक्ये उपसंहारप्राबल्यमुदाहृतं तदप्ययुक्तं तत्रापि श्येनशब्दस्य यागनामत्वाय ज्योतिष्टोमनाम्न इव प्रवृत्तिनिमित्तापेक्षानुरोधेनैव वाक्यशेषोपदर्शितसादृश्यावलम्बनेन गौणत्वाङ्गीकारात् । अन्यथा श्येनशब्दस्य रूढ्या पक्षिपरत्वे कर्ममात्रविधिस्वीकारे गुणश्रवणवैयर्थ्यापत्तेः । कर्मणि गुणविधिस्वीकारे फलश्रवणवैयर्थ्यापत्तेः । फलाय गुणविशिष्टकर्मविधिस्वीकारे विशिष्टविधिगौरवापत्तेः फले कर्मणः कर्मणि गुणस्य च विधिस्वीकारे वैरूप्येण विरुद्धत्रिकद्वयापत्तेः कर्माश्रित्य फलाय गुणविधिस्वीकारे विप्रकृष्टविधानस्य धातोरत्यन्तपारार्थ्यस्य चापत्तेर्वाक्यशेषोपदर्शितश्येनसादृश्येन शब्दस्य यागे गौणनामत्वे सम्भवति सोमेन यजेत दध्नेन्द्रियकामस्य जुहुयादित्यादिवत् अनन्यगतिकविशिष्टविधित्वादिकल्पनायोगादत उदाहृतसर्वदोषपरिहाराय श्येनशब्दस्य यागनामत्वसिद्धये प्रवृत्तिनिमित्ताकाङ्क्षयैव वाक्यशेषानुसरणम् । अतएव यत्रोपक्रमस्य नाकाङ्क्षा तत्र तद्विरुद्धार्थोपस्थापकोपसंहारानुसरणं न क्रियते यथा 'अवकाभिरग्निं विकर्षति' इत्यत्रावकाशब्दस्या'पो वैशान्ता'इति वाक्यशेषानुसा-

(१) पर्यवसाननियमाभ्युपगमपीति पु० पा० ।

रेणाप्सु लक्षणा नोपेयते अर्थवादाधिकरणे गुणवादसूत्रेणापो वै शान्ता इत्यभिजनस्तुतिद्वारेणावकानामेव स्तुतिरिति विधिस्तुत्योर्वैय्यधिकरण्यपरिहारात् । यथावाऽग्निचयने 'नैवारं चरुमुपदधाती'त्यस्य स्थण्डिलनिर्वृत्यौपयिकयथाश्रुतचरूपधानविधानेन निराकाङ्क्षस्य 'बृहस्पतेर्वा एतदन्नं यन्नीवारा' इत्युपधानरूपगुणकर्मान्वयिदेवतासम्बन्धप्रतिपादकवाक्यशेषानुसारेण यागविधायकत्वं नाङ्गीक्रियते * संयुक्तस्त्वर्थशब्देनेति * द्वितीयाधिकरणे उपक्रमस्थ नैराकाङ्क्ष्याद्वाक्यशेषस्य देवतासमर्पकत्वं निराकृत्य बृहस्पतिपदस्य ब्राह्मणपरत्वाङ्गीकारेण उत्पन्नतया नीवारस्तुतिपरत्वनिर्णयादुपसंहारप्राबल्यवादिनस्त्ववकाशशब्दस्याप्सु लक्षणा चरुमुपदधातीत्यस्य यागविधायकत्वं च स्यात् । तस्मात्तत्र निराकाङ्क्षस्य वाक्यशेषानुसारेण निराकरणात् इह श्येनवाक्ये उपक्रमाकाङ्क्षयैवोपसंहारानुसरणम् । अभ्युपेत्य चेदमुक्तं मीमांसकैर्विध्याकाङ्क्षयोपसंहारानुसरणं श्येनवाक्य इति । वस्तुतस्तत्रोपक्रमानुसारेणोपसंहार एवान्यथा नीतः उपसंहारस्य पक्षिपरत्व एवाङ्गश्येन यागपरत्वे तदनाङ्गस्यात् । तथाहि पक्षद्वयेपि तावत्तत्रोपमानभागस्य यथा श्येनपक्षी निपत्य मत्स्यादिकमादत्त इत्यर्थः तत्र मत्स्यकमित्यस्यानुपादानेपि प्रसिद्धस्यैव दृष्टान्तीकर्तव्यतया तल्लाभानुपमेयभागस्य त्वेवमयं यजमानस्य शत्रुं मारयतीत्यर्थः । पक्षिणि यागे चोभयत्रापि शत्रोर्मुख्यस्य निपत्यादानस्यासम्भवात् पक्षिपक्षे फले यागे वा साधनत्वेन विनियुक्तस्य पक्षिणः शत्रोरादाने व्यापारासम्भवाद्यागपक्षे क्रियायां निपतनादानक्रिययोः सर्वथैवासम्भवाच्च । एवं च वाक्यशेषस्य पक्षिपरत्वे यथा श्येनः पक्षी निपत्य मत्स्यादिकमादत्ते एवमयं फले यागे वा विनियुक्तः श्येनः पक्षी यजमानस्य शत्रुं मारयतीत्यर्थः अत्र श्येनपक्षिनिष्ठयोर्लोकप्रसिद्धमत्स्याद्यादानविध्युद्देशोपात्तद्विषन्मारणयोरेवोपमानोपमेयभावः प्रतीयते नतु श्येनस्यैव श्येनेनेति नाभेदेन सादृश्यानुपपत्तिः । यद्यपि तयोः साधारणधर्मानोपात्तः तथापि यथा जले स्वच्छन्दं विहरतो मत्स्यस्य श्येनकृतनिपत्यादानं झटित्यशङ्कितोपस्थितं भवति तथा तत्कृतं द्विषतो मारणमपीति गम्यसाधारणधर्मोस्त्येव तथा च यथा 'कप्या-

सं पुण्डरीकमेवमक्षिणी'त्यादाविव गम्यसाधारणधर्मेणोपमानोपमेयाभावनिर्देशेपि न काचिदनुपपत्तिः अवश्यं च तस्य साधारणधर्मस्य गम्यत्वं पक्षान्तरेप्यभ्युपगन्तव्यं अन्यथा द्विषन्मरणमात्रस्य विष्णुद्देशादेवावगतत्वेन वाक्यशेषात् दृष्टान्तबलेन तदनवगतशैघ्र्यानवगमे ततः प्रवृत्तिविशेषकरस्तुतिविशेषालाभप्रसङ्गात् तथाच यथा लोके प्रच्छन्नतया गृहं प्रविश्य प्रच्छन्नतयैव निर्गते चैत्रे तस्य प्रच्छन्नतया गृहप्रवेशमात्रं जानानमन्यं प्रति यथा देवदत्तो गृहं प्रविष्टः तथैव निर्गत इति वाक्येन देवत्तनिष्ठयोरेव प्रवेशनिर्गमनक्रिययोः प्रच्छन्नकृतत्वरूपगम्यसाधारणधर्मेणोपमानोपमेयभाव उच्यते नतु देवदत्तस्यैव देवदत्तेनेति मुख्य एवोपमानोपमेयभावः तथाऽत्रापीत्युपपद्यते अयमित्यस्य च सन्निहितप्रथमान्तपदोक्तपक्षिपरत्वेनार्जवं लभ्यते यागपरत्वे तु वाक्यशेषस्यायमित्यस्य व्यवहितयज्युपात्तकरणपरामर्शित्वेनानार्जवं स्यात् । पक्षियागयोश्च मुख्य उपमानोपमेयभावः स्यात् अनुगतसाधारणधर्मभावेन मुख्यसादृश्यासम्भवात् पक्षिणि मत्स्यादिकर्मकमुख्यं निपत्यादानं यागे तु भ्रातृव्यकर्मकं मारणमेवाशङ्कितोपस्थितिकत्वगुणयोगात् तथोपचरितं मुख्यं निपत्यादानमिति तत्प्रयोज्यपक्षियागयोरमुख्यमेव पक्षिसादृश्यम् । न च यागपरत्वपक्षेपि पक्षियागगतयोर्मत्स्यादानभ्रातृव्यमारणयोरेवोपमानोपमेयत्वमुच्यतामिति वाच्यम् । तावता यागे श्येनशब्दप्रवृत्तिनिमित्तस्य श्येनसादृश्यस्यालाभात् उपसंहारानुसारेण श्येनशब्दगौणत्वोक्त्ययोगात् । तस्मादुपक्रमे लाघवाद्यनुसारेण यागमात्रविधिनिर्वाहाय श्येनशब्दस्य यागनामत्वंसिद्धये प्रवृत्तिनिमित्तापेक्षायामन्यत्र रूढस्य तत्र मुख्यप्रवृत्तिनिमित्तासम्भवेपि गौणप्रवृत्तिनिमित्तलाभायोपक्रमाकाङ्क्षानुसारेणैव वाक्यशेषे अयमित्यस्य व्यवहितकरणपरामर्शित्वं वाक्यशेषस्यामुख्यसादृश्यपरत्वं च कल्पितमिति तन्नोपक्रमानुसारेणोपसंहारो नीत इत्येव युक्तम ।

यत्तु वैश्वानरवाक्ये उपसंहारप्राबल्यमुदाहृतं तदतितुच्छम । न हि तन्नोपसंहारानुसारेण उपक्रमे श्रुतस्य कस्य चिदुपमर्दोस्ति उपक्रमावगतपुत्रजननानिमित्तत्वापरित्यागेनैव रात्रिसत्रन्यायेन वाक्यशेषावगतफलस्यापि स्वीकारात् त-

त्स्वीकारोपि विध्याकाङ्क्षयैव प्रवर्त्तकस्यैव विधेः फलविशेषसाधनत्वज्ञानं विना पुरुषस्याप्रवृत्त्या प्रवर्तकस्या(१)पर्यवसानात् । अत एवान्यतः प्रवृत्तिलाभेन विधेराकाङ्क्षाविरहात्पर्णमयीवाक्यशेषे श्रुतस्याप्यपापश्लोकश्रवणादेर्नतत्फलत्वमुपेयते । वस्तुतस्तु वैश्वानरवाक्येप्युपक्रमप्राबल्यमेव सुवर्चं यस्मिन्जात इत्यादिवाक्यशेषे पुत्रेष्टिपूतत्वभवनयोरुभयोरपि वर्तमानापदेशेन तुल्यकालत्वप्रतीत्या पूतत्वादेः पुत्रेष्टिफलत्वानवगमेपि विधेः प्रवर्तकत्वपर्यवसानाय फलविशेषाकाङ्क्षयैवाश्रुतफलकल्पनाद्धरं श्रुतस्यैव पूतत्वादेः फलत्वविपरिणाम इति यत्पदस्य व्यत्यासेन योजनं गुणार्थसनर्थाद्यन्तर्भावं च कल्पयित्वा यं पूतत्वादियुक्तं भावयितुमिच्छति तस्मिन्जात एतामिष्टिं निर्वपेदिति विपरिणामेन वाक्यशेषस्य फलसमर्पकत्वाभ्युपगमात् तस्मादुपक्रमप्राबल्य एवोदाहरणीयानि अक्काधिकरणादीनि कथमर्वाचीनैरुपसंहारप्राबल्ये उदाहृतानीति न विद्मः । ननु प्रस्तरप्रहरणं सूक्तवाकमन्त्रगतायुरादीनां फलत्वमुपगतं तत्र विध्याकाङ्क्षया अङ्गतयान्वतः प्रवृत्तिलाभेन तद्विरहादिति तत्र मन्त्ररूपोपसंहारप्राबल्यमेवोपासनीयम् । उच्यते । न मन्त्रप्रकाश्यत्वेन तत्र तेषां फलत्वं किन्तु श्रुतिर्विनियुक्तकृत्स्नसूक्तवाकमन्त्रप्रकरणत्वान्यथानुपपत्त्या ' सूक्तवाकेन प्रस्तरं प्रहरतीति ' कृत्स्नसूक्तवाकः प्रस्तरप्रहरणे विनियुक्तः न चासौ साक्षात्प्रहरणं प्रकाशयितुं शक्नोति नापि तत्साधनं प्रस्तरं तस्मात् ज्ञायते यदनेन प्रकाश्यते तत्प्रहरणसम्बन्धीति नह्यन्यथा श्रुत्यवगतं कृत्स्नस्य सूक्तवाकस्य प्रहरणाङ्गत्वं घटते क्रियातत्सम्बन्धिप्रकाशनेनैव हि मन्त्रस्य करणता सूक्तवाकेन चाग्न्यादयोदेवताः प्रकाश्यन्ते आयुरादीनि च फलानि तत्र देवता साधनतां प्रतिपद्यते फलानि साध्यत्वमेव इत्थमेव नावभिके सूक्तवाकाधिकरणे आयुरादीनां फलत्वव्यवस्थापनं कृतं न मन्त्रप्रकाश्यत्वमात्रेण, 'उरु प्रथस्वोरु ते यज्ञपतिः प्रथता'मितिलिङ्गविनियोज्यमन्त्रप्रकाश्यस्य यज्ञपतिप्रथनस्य हि पुरोडाशप्रथनफलत्वं निराकृतं मन्त्राधिकरणभाष्ये । ननु तथाप्यन्यदस्ति उदाहरणं उपसंहारप्राबल्ये तथा हि दशमे*न चेदन्यं प्रकल्पयेत् प्रकल्पावर्थवादस्यानार्थक्यात्परसामर्थ्याच्चे * त्य-

(१) प्रवर्तकत्वा Sपर्यवसानात् । पु० पा ० । अयं युक्तः ।

धिकरणे अग्निहोत्रं प्रकृत्य श्रुतेन 'जर्तिलयवाग्वा वा जुहुयात् गवीधुकयवाग्वा वा न ग्राम्यान् पशून् हिनस्ति नारण्यानिति' वाक्येन जर्तिलगवीधुकशब्दवाच्यारण्यतिलारण्यगोधूमकृतयवाग्वोर्विकल्पनाग्निहोत्रहोमद्रव्यत्वविधाने लिङ्गविभक्तिबलेन ग्राम्यारण्यपशुहिंसारहिततया तयोः स्तवनेन च प्रतीयमानेपि 'अथो खलु रनाहुतिर्वै जर्तिलाश्च गवीधुकाश्च' 'पयसाग्निहोत्रं जुहुयादिति' तदनन्तरं जर्तिलादिप्रतिक्षेपेण पयोविधिदर्शनात् तदेकवाक्यतया जर्तिलयवाग्वा वा जुहुयादित्यादेर्ग्राम्यारण्यपशुहिंसारहित्येन प्रशस्ततया होमार्हाणामपि जर्तिलगवीधुकानां पयोपक्षया दुष्टत्वात्पयः प्रशस्तमिति पयःस्तुतिलक्षकत्वप्रदर्शनेनोपसंहारप्राबल्यमाश्रितम्। न चानर्थक्यहेतुना सूत्रकृता पयःस्तुतिपरत्वमुक्तं नोपसंहारानुसारेणेति वाच्यम् । पयसा सह विकल्पार्थं जर्तिलादिविधानसम्भवेनानर्थक्याभावात् तेन हेतुना जर्तिलयवाग्वा वा जुहुयादित्यादेः पयस्तुत्यर्थत्वासिद्धेः अनाहुतिर्वै जर्तिलाश्चेत्यादेः जर्तिलादिनिषेधरूपत्वमेव न तु पयःस्तुत्यर्थत्वमिति शङ्कायां विहितजर्तिलादिनिषेधस्य ग्रहणाग्रहणवद्विकल्पार्थकत्वाद्विकल्पस्य च 'पयसा जुहुयादिति' द्रव्यान्तरविधानादेव च सिद्धेर्निषेधानर्थक्यात् । न हि निन्दान्यायेन पयोविधिस्तुत्यर्थतैवेत्यानर्थक्यहेतोरनाहुतिर्वा इत्यादिभागस्य पयःस्तुत्यर्थतागमकत्वात् । * शिष्ट्वा तु प्रतिषेधः स्यादिति * पूर्वाधिकरणे अतिरात्रे षोडशिनं गृह्णातीति विधायाम्नातो नातिरात्रे षोडशिनं गृह्णातीत्ययं तत्प्रतिषेधः न तु नानूयाजेष्वित्यादिवत्पर्युदासादिरूप इत्युक्तेः तर्हि तद्वदेव अनाहुतिर्वा इत्ययमपि प्रतिषेध इति शङ्कायां तन्निराकरणाय सूत्रप्रवृत्तेश्च तथाचास्मिन्सूत्रे शिष्ट्वा(२)प्रतिषेधः स्यादिति पूर्वसूत्रानुषङ्गेण न चेदन्यं विधिं कल्पयेद्यत्र प्रत्यक्षो विधिः सन्निहितो न स्यात्ततः षोडशिग्रहणाग्रहणवदेकेन शिष्ट्वा परेण प्रतिषेधः स्यात् इह तु पयसाग्निहोत्रं जुहुयात् इति विध्यन्तरस्य कल्पत्वात्तच्छेषभूतोऽयमर्थवादः स्यात् विहितप्रतिषेधफलस्य विकल्पस्य पयोरूपद्रव्यान्तरविधानादेव सिद्धेः प्रतिषेधानर्थक्यादियुक्तेः जर्तिला-

---

(१) शिष्टत्वात्तु इति पू० पा० ।

यनाहुतित्वकीर्तनस्य कथं पयःप्रशंसापरत्वमिति शङ्क्यार्थो यो हेतुरुच्यते परस्तामर्थ्यात्परेण पयोविधिनाऽर्थवादत्वेनान्वये सामर्थ्यादिति तत्साधारण्यादेव जर्तिलयवाग्वा जुहुयादित्यादेः पयोविधिशेषत्वं वक्तव्यं दृष्टं हि कस्य चिन्निन्दायास्तदितरस्तुतौ पर्यवसानवत् कस्य चिद्विधिस्तुतिपूर्वकनिन्दाया अपि सहैव विधिस्तुतिभ्यामितरस्तुतौ पर्यवसानं यथा देवदत्तस्तावदतीव विद्वानित्युक्त्वा न तस्य बृहस्पतिरपि समान इति च स्तुत्वा सोपि यज्ञदत्तमपेक्ष्याविद्वानित्युक्तेः सर्वस्यापि यज्ञदत्तस्तुतौ पर्यवसानमिति तथाच पश्चात्पयोविधिदर्शनादुपक्रमावगतस्य जर्तिलयवाग्वादिविधेस्त्याग इत्युपसंहारप्राबल्यापेक्षणं दुर्वारमिति मैवम् । तत्रानेकदृष्टकल्पनानुबन्धिवाक्यभेदपरिहाराय जर्तिलादिविधित्याग इत्युपसंहारप्राबल्यानाश्रयणात् यत्र ह्यनेकविधायकश्रवणं तत्रैकस्य विधायकत्वं अन्यस्यानुवादकत्वमित्येकवाक्यत्वसम्भवे वाक्यभेदावहो विधिभेदो न स्वीक्रियते अत एव 'नगिरा गिरेति ब्रूयादैरं कृत्वोद्वेय' मित्यत्र गिरापदकार्ये (१) इरापदविधानादेव गिरापदनिवृत्तिसिद्धेरैरं कृत्वोद्वेयमित्येव विधिः न गिरा गिरेति ब्रूयादिति तु तत्प्राप्तगिरापदनिवृत्त्यनुवाद इरापदस्य गिरापदकार्यापत्तिसिद्धये तत्कार्यलक्षणार्थं नतु गिरापदप्रतिषेधविधिः गिरापदनिषेधमात्रादिरापदस्याप्राप्तैरैरं कृत्वोद्वेयमित्यस्यापि विधायकत्वापत्त्या वाक्यभेदापत्तेरित्युक्तं अत एव च नचतुस्त्रिंशादिति ब्रूयात् षड्विंशतिरिति ब्रूयादित्यश्वमेधे अश्ववंक्रीयस्याप्रकाशनाय पठिताया 'श्रुतुस्त्रिंशद्वाजिनोदेवबन्धोर्वंक्रीरश्वस्य स्वधितिः समेती'त्यस्या ऋचो न चतुस्त्रिंशदिति प्रतिषेधेन प्राप्तस्य षड्विंशतिरस्य वंक्रय इति वंक्रिमन्त्रस्य यथाप्राप्त्यनुवादमात्रं षड्विंशतिरित्येवब्रूयादिति वचनं न तु प्राकृतमन्त्रे षड्विंशतिपदनियमेपि तस्य तात्पर्यं तस्यापि विधाने वाक्यभेदापत्तेरिति तूपरगोमृगयोरश्वस्य वंक्रिणा समस्य वचनस्य षडशीतिरेषां वंक्रय इत्येवंरूपस्याबाध उक्तः एवं रथन्तरे प्रस्तूयमाने सम्मीलयेत् स्व(२)देशं प्रति वीक्षेतेत्यादिष्वपि बहुषु स्थलेषु वाक्यभेदपरिहारायैकोविधिरपरोऽनुवाद इति व्यवस्थापनं दृष्टं एवमिहापि वाक्यभेदपरिहाराय जर्तिलादिवाक्यस्य विधिसरू-

(१) पदवाक्ये इति पु० पा० । (२) स्वसदृश पा० पु० ।

पार्थवादत्वाश्रयणमिति नानेनोपसंहारप्राबल्यसिद्धिः ।

यत्तु क्वचिदुक्तं अर्थैकत्वाधिकरणे 'यद्दचाऽस्तुवत' इत्यस्याकर्तृविशेषणविधिशक्त्यप्रतिबन्धकयच्छब्दयुक्तस्यापि उपक्रमस्य 'य एवं विद्वान्साम्ना स्तुवीतेति' कर्तृविशेषणविधिशक्तिप्रतिबन्धकयच्छब्दयुक्तोपसंहारबलेन स्वतः प्राप्तमृग्विधानत्वं परित्यज्य सामविधिशेषत्वस्वीकारादुपसंहारप्राबल्यमाश्रितमिति तदप्यनेन निरस्तम् । तत्रापि वाक्यभेदादिदोषपरिहारार्थमौपसंहारिकसामविधिशेषत्वस्वीकारात् । तथा हि उपक्रमे 'यद्दचास्तुवत तदसुरा अन्ववायन् यत्साम्ना स्तुवते तदसुरां नान्ववायन्निति' ऋचा स्तुतिः साम्ना स्तुतिश्चेत्युभयं श्रूयते न तु ऋचा स्तुतिमात्रं विधिस्तूभयत्रापि न श्रूयते तत्कल्पना चोभयत्र न सम्भवति एकवाक्यत्वसम्भवे वाक्यभेदस्यान्याय्यत्वात् प्रकृते चासुरागमनहेतुत्वेन भयावहतया ऋचा स्तुतिं निन्दित्वा साम्ना स्तुतिर्विधीयत इति वा अवश्यानामसुराणामपि वशीकरणहेतुत्वेन स्तुताम्ऋचा स्तुतिं विधायाग्रे तच्छेषतया साम्ना स्तुतिरवश्यवशीकरणासमर्थत्वेन निन्द्यत इति वा एकवाक्यत्वसम्भवात् । न चात्र किं चिदन्यतरस्मिन् पक्षे विनिगमकमुपक्रमे दृश्यते न च तत्र विनिगमकादर्शनमात्रेण वाक्यभेदमभ्युपगम्य उभयत्र विधिकल्पनं युक्तं असुरान्ववायन्नित्यस्य भयावहत्वेन निन्दापरत्वे ऋचा स्तुतौ विध्ययोगात् अवश्यवशीकरणसमर्थत्वेन स्तुतिपरत्वे तदसमर्थत्वेन निन्द्यमानायां साम्ना स्तुतौ विध्ययोगात् । न चान्ववायन्नित्यस्यावश्यवशीकरणसामर्थ्येन स्तुतिपरत्वं नान्ववायन्नित्यस्य भयावहागमनहेतुत्वेन स्तुतिपरत्वमिति द्विरूपार्थकल्पनमुचितं प्रथमवाक्ये यदभिप्रायेणासुरा अन्ववायन्नित्युक्तं तन्निषेध एवासुरा नान्वयन्नित्यस्य स्वारस्यात् ततश्च वाक्यभेदस्य ऋचा साम्ना च स्तुत्योर्विकल्पस्योभयोरन्ववायन्नित्येतयोर्भिन्नार्थत्वस्य च परिहाराय किमन्यतरत्र विधौ विनिगमकमस्तीति स्वत एवोपक्रमस्य विनिगमकापेक्षया साम्ना स्तुवीतेति प्रत्यक्षविधेस्तद्विनिगमकत्वेनाश्रयणं नत्वौपसंहारिकत्वेन प्राबल्यात् ततश्च तदनुसारेणासुरा अन्ववायन्नित्यस्य निन्दापरत्वनिर्णयः अत एव स्तुतौ सन्दिग्धं विधिनाऽवधार्यत इत्यस्येदमुदाहरणमिति प्राग्दर्शितं ।

ननूपक्रमप्राबल्ये यद्वचा स्तुवत इति परमोपक्रमश्रवणमात्रेण ऋचा स्तुतौ विधिरित्यवधारिते तदनुसारेणैव तदनन्तरश्रुतं सर्वं नेतव्यं स्यादिति चेत् । स्यादेवं यदि तत्र प्रत्यक्षोविधिः श्रूयेत कल्प्यस्तु तत्र विधिः कल्पनं च तद्विरुद्धप्रत्यक्षश्रुतोवाक्यशेषोनिरूणद्धीत्यावेदितमक्ताधिकरणार्थनिर्णय इत्येषा दिक् ।

एवमन्यत्रापि सम्भाविताः क्षुद्रापद्रवा अनयैव दिशा निरसनीयाः। यत्तूपक्रमप्राबल्यवादे किमुपक्रमे प्रतीतमात्रस्य ग्राह्यत्वमित्यादिप्रलपितं तदुपसंहारप्राबल्यवादे किमुपसंहारे प्रतीतमात्रस्य ग्राह्यत्वं किंवा उपक्रमपरामर्शेन व्यवस्थितस्य, आद्ये उच्चैष्ट्रादीनामृगादिधर्मत्वापत्तिः द्वितीये उपक्रमस्यैव प्राबल्यं सिद्ध्येदिति प्रतिवचनमेव रिक्तीकरोति । वस्तुस्थितिस्तु उपक्रमस्वारस्येन प्रतीतं ग्राह्यं नोपसंहारपरामर्शेन व्यवस्थितं श्येनादिवाक्ये विशिष्टविधिगौरवादिभिया उपक्रमस्य स्वारस्येनैव पक्ष्यादेरग्रहणं नोपसंहारानुसारेणेत्यावेदितमेव तस्माद्वार्तिकोक्तरीत्या निरवद्यमुपक्रमप्राबल्यम्। एवं पूर्वमीमांसायां व्यवस्थितमुपक्रमप्राबल्यमुररीकृत्यैवोत्तरमीमांसायामपि भगवत्पादैः तत्रतत्रार्थनिर्णयाः कृता दृश्यन्ते । यत्त्ववाचीनैः पूर्वमीमांसायामिवोत्तरमीमांसायामप्युपसंहारप्राबल्योपजीवनमस्ति तत्र तदन्तरप्रतिपत्तावित्यधिकरणे ' तस्मिन्नेतस्मिन्नग्नौ देवाः श्रद्धां जुह्वति'इतिपञ्चाग्निविद्यागतवाक्ये श्रद्धाशब्दस्य 'इति तु पञ्चम्यामाहुतौ आपः पुरुषवचसोभवन्ती'त्युपसंहारानुसारेणाप्युपलक्षणायाः *प्रथमे ऽश्रवणात् इति चेन्न ता एव ह्युपपत्तेरिति*सूत्रणोक्तत्वादित्युदाहरद्भिस्तत्रापि स्वाभ्युत्पत्तिप्रकटनं कृतं तस्य यथाश्रुतं भगवत्पादीयं तत्सूत्रगतोपपत्तिपदव्याख्यानमेव निराकरणं भगवत्पादैर्हि'वेत्थ यथा पञ्चम्यामाहुतावापः पुरुषवचसोभवन्तीति'परमोक्तमप्रश्नोपपत्तिः'वेत्थ यथा पञ्चम्यामाहुतावापः पुरुषवचसोभवन्ति इति तु पञ्चम्यामाहुतावापः पुरुषवचसोभवन्तीति' प्रश्नप्रतिवचनैकरूप्योपपत्तिः श्रद्धाकार्यसोमवृष्ट्यन्नरेतोरूपानन्तराहुतिद्रव्याणां जलप्रचुरोपपत्तेः(१)प्रत्ययविशेषरूपायाः श्रद्धायाः स्वोपादानादर्वाच्छ्रद्धान्यत्र प्रक्षेपस्यासम्भवेनाहुतिद्रव्यत्ववर्णनायोगात् श्रद्धाशब्दस्य स्वत एव

---

(१) पपत्तेः प्रत्यवि० पा० पु० ।

प्रक्षेपयोग्यद्रव्यपरत्वाकाङ्क्षायां वाक्यशेषसमर्पितास्वप्सु तात्पर्योपपत्तिः 'श्रद्धावा आप' इत्यादौ श्रद्धाशब्दस्याप्यप्सु हुप्रयोगत्वेन तल्लक्षणोपपत्तश्च 'श्रद्धां जुहोती'त्यत्र श्रद्धाशब्दस्याप्युपलक्षणाऽभ्युपगमे मूलत्वेन व्याख्याता नोपसंहारमात्रोपपतिः तस्मात्तत्रायमस्थाने भ्रमः इह त्वेवं सम्भवति भ्रमः *अन्यथात्वं शब्दादिति चेन्नाविशेषा*दित्यधिकरणे 'हन्तासुरान्यज्ञ उद्गीथेनात्ययामे'त्युद्गीथोपक्रमेणोद्गीथस्योपास्यत्वे प्रतीयमानेप्युपसंहारे 'तेऽस्य एष प्राण उद्गाय'दित्यादौ उद्गातृपरामर्शात्तदनुरोधेनोद्गातुरेव प्राणदृष्ट्योपास्यत्वं नोद्गीथस्येति निर्णयः कृतः । *न संख्योपसङ्ग्रहादपी*त्यधिकरणे 'यस्मिन्पञ्चपञ्च जना आकाशश्च प्रतिष्ठितस्तमेव मन्य आत्मानं विद्वान् ब्रह्मामृतामृतमिति' वाजसनेयकाम्नातमन्त्रगतस्य मनुष्येषु रूढस्य पञ्चजनशब्दस्य 'प्राणस्य प्राणमुत चक्षुषः चक्षुः श्रोत्रस्य श्रोत्रं मनसो मनो विदुरिति' वाक्यशेषसङ्कीर्तितेषु प्राणादिषु वृत्तिः *प्राणादयो वाक्यशेषादिति* सूत्रेणैवोक्ता । पारिप्लवाधिकरणे च 'सर्वाण्युपाख्यानानि पारिप्लवे संस्तौतीति' विध्यनुसारेण 'प्रतर्दनो ह वै दैवोदासिरिन्द्रस्य प्रियं धामोपजगाम युद्धेन च पौरुषेण च' 'मटचीहतेषु कुरुष्वाटक्या सह जायया उषस्तिर्हचाक्रायणः इभ्यग्रामे मद्राणाक्ष उवास' इत्यादिब्रह्मविद्याङ्गभूतोपाख्यानानामपि पारिप्लवार्थत्वे प्राप्ते 'मनुर्वैवस्वतो राजे' त्यादिवाक्यशेषसङ्कीर्तिताख्यानविशेषेषु सर्वशब्दस्य सङ्कोचमभ्युपगम्य तेषामेव पारिप्लवार्थत्वं * पारिप्लवार्था इति चेन्नाविशेषितत्वा * दितिसूत्रेण निर्णीतम् । दहराधिकरणे च 'अथ यदिदमस्मिन्ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाशः तस्मिन्यदन्तः तदन्वेष्टव्यं तद्वाव विजिज्ञासितव्यं तं चेद्ब्रूयुर्यदिदमस्मिन्ब्रह्मपुरे दहरीकं वेश्म दहरोऽस्मिन्नन्तराकाशः किं तत्र विद्यते यदन्वेष्टव्यं यद्वाव विजिज्ञासितव्यमिति स ब्रूयाद्यावान्वा अयमाकाशस्तावानेषोऽन्तर्हृदय आकाश उभे अस्मिन् द्यावापृथिवी अन्तरेव समाहिते इत्यादि' वाक्ये तस्मिन्यदन्तस्तदन्वेष्टव्यमित्युपक्रमे तस्मिन्नित्यस्याव्यवहिताकाशपरत्वस्वारस्येन आकाशान्तर्वर्तिनस्ततोऽन्यस्यान्वेष्टव्यत्वप्रतीतावपि 'यावान्वाअयमाकाश' इत्यादिवाक्यशेषे दराकाशस्य बाह्याकाशसमानपरिमाणत्वादिमहिमवर्णनदर्शनात्तस्यैवान्वेष्टव्यत्वं परब्रह्मरूपता चेत्युभयं *दहर उत्त-

रेऽय* इति सूत्रे निर्णीतं एवमेतेष्वधिकरणेषु भगत्पादरीत्योपसंहारानुसरणं प्रतीयत इत्यत्रैवं प्रतिबोधनीयम । * अन्यथात्वं शब्दादिति चेत्यधिकरणोदाहरणे उपक्रमोपसंहारयोर्विरोध एव नास्ति तत्रोपक्रमप्रतीतोद्गीथापरित्यागेनैवोद्गीथगानकर्तृरूपे उद्गातरि प्राणदृष्टिविधानाभ्युपगमात् उपक्रमस्य लक्षणादिकल्पनं विनोपसंहारसमर्पितविशेषावापमात्रं हि न तेन विरुद्ध्यते यथा गुरुमते आग्नेयादियागानामुत्पत्तिवाक्यावगतेन यागत्वेन 'चतुरवत्त जुहोतीति'गुणविधिवाक्यावगतस्तेषु प्रक्षेपाधिकत्वरूपहोमत्वावा ो न विरुध्यते 'यस्मिन्पञ्च पञ्चजना' इति मन्त्रे पञ्चमनुष्याः परब्रह्मणि सन्तीत्यितावता परब्रह्मणः कस्य चिदुत्कर्षस्याप्रतीतेः पञ्चजनशब्दस्यान्यत्रैव क्वचिदर्थेतात्पर्यमिति सामान्यतोऽवगतौ तद्विशेषाकाङ्क्षायां वाक्यशेषसमर्पितप्राणादिपरिग्रहो न तु तदनुसारेणोपक्रमस्यान्यथानेयनम । सर्वाण्युख्यानानिपारिप्लवे शंसंतीत्यत्रानन्तशाखागतसर्वाख्यानशंसनस्याशक्यतयोपक्रमस्यैव केन चिदवच्छेदेन आख्यानसामस्त्ये पर्यवसानाकाङ्क्षया वाक्यशेषसङ्कीर्तिताख्यानसामस्त्ये पर्यवसानं नोपसंहारानुसारेण दहराधिकरणे दहराकाशस्य परब्रह्मता वाक्यशेषगतश्रुतिलिङ्गभूयस्त्वेन निर्णीता*विप्रतिषिद्धधर्माणां समवाये भूयसां स्यात्सधर्मत्वमिति* न्यायादत एव तत्र उत्तरेभ्य इति बहुवचनेन लिङ्गभूयस्त्वं दर्शितं वाक्यशेषे च यावान्वा अयमाकाश इत्यादिना प्रतिपादितं प्रसिद्धाकाशसादृश्यं उभेऽस्मिन् द्यावापृथिवी इत्यारभ्य यच्चास्येहास्ति यच्च नास्ति सर्वं तस्मिन्समाहितमित्यन्तेन प्रतिपादितं द्यावापृथिव्यग्निवायुसूर्यचन्द्रविद्युन्नक्षत्रादिसकलजगदाधारत्वं 'एष आत्माऽपहतपाप्मा विजरो विमृत्यु'रित्यादिना प्रतिपादितमपहतपाप्मत्वादिगुणाष्टकमित्यादीनां लिङ्गानां भूयस्त्वं स्पष्टमेव 'एष आत्मा अथ य इहात्मानमित्याद्यात्मश्रुतयश्च सन्ति गुणसूत्रोक्ताश्च गत्यादयः तथाच बहूनामेषामनुग्रहाय त्यजेदेकं कुलस्यार्थ इति न्यायेन आकाशश्रुतिरेकाऽन्यथा नीयते बहुबाधस्यान्याय्यत्वात् । न चात्मार्थे पृथिवीं त्यजेदिति ततोऽपि बलवता न्यायेन प्रधानविरोधिनां बहूनामपि गुणानां बाधनं न्याय्यं उपक्रमोपसंहारैकरूप्यावगतप्रधानवेदान्तप्रतिपाद्याद्वैतविरोधिनां बहूनामपि तत्तत्पदसमर्पितप्रवृत्तिनिमित्तभूतधर्माणां बा-

धाभ्युगमात्सूक्ष्मखादिरादिप्रधानयूपद्रव्यविरोधिनां तक्षणादीनां बहूनामपि बाधस्य पूर्वतन्त्रे * द्रव्यसंस्कारविरोधे द्रव्यतदर्थत्वा * दित्यधिकरणे प्रतिपादनाच्च विप्रतिषिद्धधर्माणां समवाय इत्यधिकरणन्यायो यत्र तुल्यप्रधानानामेव प्रथमचरमभावमात्रं विशेषस्तत्रैव अतएव तत्र पञ्चदशरात्रे अग्निष्टुत्प्रथममहस्तद्धर्मतयोपसत्स्वाग्नेयी सुब्रह्मण्या प्राप्ता उत्तराणि ज्योतिर्गौरायुरित्यादीनि चतुर्दशाहानि तद्धर्मतयैन्द्री प्राप्ता एवमहर्धर्मयोर्विरोधे सत्यन्हां समप्रधानत्वेन गुणप्रधानभावादिविशेषानवगमेन कस्य धर्मो ग्राह्य इत्याकाङ्क्षायां मुख्यत्वादग्निष्टुतस्तद्धर्मग्रहे प्राप्ते पाश्चात्यत्वेपि ज्योतिरादीनां भूयस्त्वात् भूयोनुग्रहस्य न्याय्यतया ज्योतिरादि धर्मो ग्राह्य इति सिद्धान्ततम । यत्र तु भूयसामेकस्य च गुणप्रधानभावादिविशेषः न तत्र भूयोनुग्रहादरो यथोदाहृतद्रव्यसंस्कारविरोधाधिकरणे तत्र हि यदा तनुत्वात्तक्षणादिसंस्कारयोग्यः पशुनियोजनमात्रयोग्यः खदिरोलब्धः तत्प्रतिनिधिः कदरस्तु महान् तक्षणादीनामपि योग्यो लब्धः तत्र यूपार्थं कस्योपादानं कर्तव्यमिति संशय्य कदरोपादाने खादिरो यूपो भवतीत्यस्य किं चिद्वैकल्येपि तक्षणादीनां बहूनामनुग्रहलाभात् कदरोपादानं युक्तमिति प्राप्ते बहूनामपि तक्षणादिसंस्काराणां द्रव्यार्थत्वादगुणानुरोधेन प्रधानपरित्यागो न युक्त इति खदिरोपादानं कर्तव्यमिति सिद्धान्ततं । अनुनिर्वाप्याधिकरणे च अग्निचयने अग्नीषोमीयस्य पशुपरोडाशमष्टौ देवसुवां हवींष्यनु निर्वपतीत्यत्र किमग्नीषोमीयपशुधर्मा एकादश प्रयाजत्वादयो ग्राह्या उत अनुनिर्वाप्यधर्माः पञ्च प्रयाजत्वादय इति संशय्य भूयोऽनुग्रहन्यायेनानुनिर्वाप्यधर्मग्रहे प्राप्ते यत्र सर्वेषां तन्त्रतया न गृह्यते विशेषः तत्र मुख्यानुग्रहन्यायापवादोभूयोऽनुग्रहः यत्र त्वेकस्तन्त्री इतरे प्रसङ्गिन इति गृह्यते विशेषः तत्रैकस्यापि तन्त्रिणा एव धर्मा ग्राह्या बहूनामपि प्रसङ्गिनां तत्तन्त्रोपजीवित्वेन स्वधर्माप्रयोजकत्वादिति निर्णीतमिति चेन्मैवोवेदान्ते ऽद्वैतवदिहोपासनापरे आकाशशब्दितस्य प्रतिपाद्यत्वरूपप्राधान्यासिद्धेः विधीयमानक्रियाकर्मत्वलक्षणस्य खदिरादिवत्प्राधान्यस्य ब्रह्मलिङ्गभूतेषु गुणेष्वप्यविशिष्टत्वात् 'अथ य इहात्मानमनुविद्य व्रजन्त्येतांश्च सत्यान्कामान् तेषां सर्वेषु लोकेषु कामचारोभवतीति' तेषामप्युपास्य-

त्वनिर्देशादग्नीषोमीयवत् तन्त्रित्वलक्षणविशेषस्य चेह शङ्कानास्पदत्वात् तस्माद्दहराकाशो ब्रह्मेति बव्हनुग्रहन्यायेन निर्णयो नोपसंहारप्राबल्येनानन्वस्त्वेवमेतत् तथापि तस्मिन् यदन्तरिति दहराकाशस्योपासना विधीयत इति कुतोऽवसीयते 'यावान्वा अयमाकाश इत्यादिना तन्महिमवर्णनादिति चेत् न । पद्मकोशप्रतीकाशमित्यादौ दहरपुण्डरीकवर्णनवत्तदन्तर्वर्तिवस्तुप्रतिपत्त्यर्थत्वेनापि तत्सम्भवात् दहराकाशान्तरवर्ति ततोऽन्यदुपास्यं न सम्भवतीति चेन्न। तदनन्तरमेवोभे अस्मिन् द्यावापृथिवी इत्यादिना तदन्तर्वर्तिवस्तुप्रतिपादनेन तस्योपास्यत्वसम्भवात् । द्यावापृथिव्यादेरुपास्यत्वे अथ य इहात्मानमित्यात्मोपास्तेः फलत्वोपसंहारोविरुद्ध्यत इति चेत्तर्हि तन्मात्रानुसारेण तस्मिन् यदन्तरित्यादेर्दहराकाशरूपपरमात्मोपासनाविधिपरत्वमिति सिद्धमुपसंहारप्राबल्यम् । नच तस्मिन्यदन्तरित्यादेः पुण्डरीकान्तर्वर्तिदहराकाशोपासनाविधिपरत्वं दहराकाशान्तर्वर्तिवस्त्वन्तरोपासनाविधिपरत्वस्यैव तत्सारस्येनावधार्यमाणतया सन्देहाभावात् तस्य पुण्डरीकान्तर्वर्तिदहराकाशोपासनाविधिपरत्वे हि तस्मिन्नित्यस्य व्यवहितपुण्डरीकपरामर्शित्वं स्यात् तच्चाव्यवहितदहराकाशपरामर्शित्वसम्भवे न युक्तं दहराकाशस्य पुण्डरीकातर्वर्तित्वस्य दहरोऽस्मिन्नन्तराकाश इत्यनेनैव प्राप्ततया तस्मिन्यदन्तरित्यस्य चैवैयर्थ्यं स्यात् तदपि तदप्राप्तदहराकाशान्तर्वर्त्तित्वपरत्वेन सार्थकत्वसम्भवे न युक्तं दहराकाशः पुण्डरीकान्तरवर्तीत्यस्य निर्ज्ञाततया तस्मिन्यदन्तरिति उक्त्यनन्तरं किं तदत्र विद्यत इति प्रश्नोप्यसमञ्जसः स्यात् तदसामञ्जस्यमपि तस्मिन्यदन्तरित्येवं संमुग्धाकारेण दहराकाशान्तरवर्तिनः कस्य चिदुपासनाविधिपरत्वे तस्य विशिष्यावगत्यर्थं किं तदत्र विद्यत इति प्रश्न इति सामञ्जस्यसम्भवे न युक्तं यत्पदस्य दहरोऽस्मिन्नन्तराकाश इति पूर्वनिर्दिष्टनिर्ज्ञातपुल्लिङ्गाकाशपरत्वे च नपुंसकलिङ्गमत्यन्तासङ्गतं स्यात् इति तस्य प्रश्नानन्तरं निर्देक्ष्यमाणानिर्ज्ञातलिङ्गवस्त्वन्तरपरत्वेन कथं चित्सङ्गतिसम्भवे तदसाङ्गत्यमपि न युक्तं एवमपि यत्तस्मिन्यदन्तरित्यस्य दहराकाशोपासनाविधिपरत्वमवगम्यते न तदुपास्तिफलोपसंहारप्राबल्येनेत्येव पर्यवस्यतीति । एतेन तस्मिन्यदन्तरित्यत्र यद्रामानुजीयं कल्पनं त-

स्मिन्निव्यव्यवहितो दहराकाशः परामृश्यते यदन्तरिति चास्मिन्काः समाहिता इति प्रश्नान्तरनिर्देश्यमाणं कमनीयतया कामशब्दवाच्यं तदवगतमपहतपाप्मत्वादिगुणजातमुच्यते अतो न कश्चित्पूर्वोक्तदोषः तदन्वेष्टव्यमिति तु तन्मात्रस्योपासना न विधीयते । अथ य इहात्मानमिति वाक्यशेषे आत्मनस्तद्गुणानां च उपासनायाः फलवत्त्वोपसंहारात् किन्तु तस्मिन्निति निर्दिष्टो दहराकाशः यादिति निर्दिष्टं तदन्तर्वर्तिगुणजातं चेत्युभयोरुपासनं विधीयते । न च नपुंसकलिङ्गैकवचनान्तेनोभयपरामर्शानुपपत्तिः, ' नपुंसकमनपुंसके नैकवच्चास्यान्यतरस्यामिति ' व्याकरणसूत्रेण नपुंसकानपुंसकयोर्नपुंसकशेषस्य एकवद्भावस्यानुशासनादुभयपरामर्शोपपत्तिरिति, तत्रापि नपुंसकैकवचनान्तस्य यत्पदस्य कामशब्दोक्तानेकगुणपरामर्शित्वात्तदस्य तस्मिन्यदिति विभिन्नविभक्तिनिर्दिष्टोभयपरामर्शित्वतदेकशेषइति त्रयमिदं किलष्टं स्वतोऽप्रतीयमानमथ य इहात्मानमित्याद्युपसंहारानुसारेणैव कल्पनीयमित्युपसंहारप्राबल्यमवर्जनीयमिति चत् । उच्यते । यावान्वा अयमाकाशस्तावानेषोन्तर्हृदय आकाश इति एतावता दहराकाशमहिमवर्णनस्य द्यावापृथिव्यादितदङ्गतवस्तुप्रतिपत्यर्थत्वसम्भवेपि तेषां तदङ्गतत्वप्रतिपादनानन्तरमारब्धस्य 'एष आत्माऽपहतपाप्मा' 'अस्मिन्कामाः समाहिता' 'अथय इहात्मान' 'मिमाः प्रजाः अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विदन्त्यनृतेन हि प्रत्यूढा' 'अथ य आत्मा स सेतुर्विधृतिरेषां लोकानामसम्भेदाय'त्यादिदहराकाशमहिमप्रपञ्चनस्य तदन्तर्गतवस्तुप्रतिपत्यर्थत्वासम्भवादुपासनार्थत्वावश्यम्भावेन तेषामनन्यथासिद्धानां भूयसामनुग्रहानुरोधेन तस्मिन्यदन्तरित्यादेर्दहराकाशस्यान्वेष्टव्यतापरत्वमवसीयते न तदुपास्तिफलोपसंहारमात्रानुरोधेन । न चैष आत्मेत्यादौ एतदादिशब्दानामव्यवहितद्यावापृथ्यादिपरत्वं शङ्कनीयं पुल्लिङ्गैकवचनान्तानां तेषां व्यवहितेष्याकाश एव स्वारस्यादुभे अस्मिन् द्यावापृथिवी इत्यादौ आकाशे अवगतस्य समाधानाधारत्वस्यास्मिन्कामाः समाहिता इत्यत्र प्रत्यभिज्ञानाच्च तथा च भूयोऽनुग्रहानुरोधेन तस्मिन्यदन्तरित्यत्र तस्मिन्नित्यस्य व्यवहितपुण्डरीकपरामर्शित्वकल्पनं न दोषः सर्वनाम्नामव्यवहितपरामर्शसम्भवे व्यवहितपरामर्शित्वस्य तस्य

द्वादशगतं दक्षिणेत्यादौ दृष्टत्वात् । यत्पदं वक्ष्यमाणद्यावापृथिव्यादिसकलविशेषणविशिष्टदहराकाशपरं अन्यथा विशेषणानां विध्य(१)संस्पर्शउपास्यत्वासिद्धेरिति नानुवादवैय्यर्थ्यं अत एव किं तदत्र विद्यत इत्यप्युपपद्यते नह्ययं प्रश्नः किन्त्वाक्षेपोयं अतिस्वल्पे आकाशे विशेषणतया किमन्वेष्टव्यं विज्ञातव्यं वास्तीति अतएव यदिदमस्मिन्ब्रह्मपुर इत्यादेः पुनरनुसङ्कीर्तनं शरीरान्तर्गतं पुण्डरीकमेव नावदल्पमल्पतरं च तदन्तर्गतमाकाशं किं तत्र वर्तते इत्याक्षेपोपयोग्यर्थद्योतनाय, प्रश्नपरत्वे किं तत्र विद्यते एतावदेव वक्तव्यं स्यात् एवमाक्षिप्ते सत्युत्तरवाक्येन भूताकाशसाहश्यप्रतिपादनं तदन्तः सर्वसमाधानप्रतिपादनाय पुण्डरीकवेष्टनकृताल्पत्वव्यावृत्तिपरमिति नासमञ्जसं किं चित् । यच्च नपुंसकलिङ्गासङ्गतिरित्युक्तं तदपि न । लुङः विषये अनद्यतनभूतेपि भूतत्वसामान्यानुवृत्तेस्तद्विवक्षया लुङः प्रयोगस्यैव सर्वविकारानुवृत्तसत्वरजस्तमोगुणानुगतं गुणत्वसामान्यं स्थितिशब्दितं नपुंसकलिङ्गमिति शाब्दिकमर्यादया नपुंसकलिङ्गस्य स्त्रीपुंलिङ्गरूपयोरपि विकारयोरनुगमात्तद्विवक्षया नपुंसकलिङ्गनिर्देशस्योपपत्ते'र्मुखनासिकावचनोऽनुनासिकः' 'द्विगुरेकवचन'मित्यादौ निर्ज्ञातान्यलिङ्गपदान्तरविशेषणानामपि नपुंसकलिङ्गत्वदर्शनाच्च । ननु लिङ्गविशेषनिर्देशात्समानविधानेष्वप्राप्ता सारस्वती स्त्रीत्वादिति पूर्वतन्त्राधिकरणे संख्यानां पशूनां च सामान्यविध्यपक्षे ऽतिरात्रगतायां सारस्वत्यां मेष्यामध्रिगुप्रैषाम्नातस्य प्रास्माअग्निं भरतस्तृणीत बर्हिरित्यस्मै शब्दस्य क्रतुपशुपरामर्शिनोपि लिङ्गत्वाद्प्रवृत्तिरुक्ता । सत्यं तत्र पुल्लिङ्गस्य स्त्रियामसाधुत्वादप्रवृत्तिरुक्ता अन्वेनम्माता मन्यतामित्यन्वादेशे पुल्लिङ्गनिर्देशनास्मा इत्यस्य पुल्लिङ्गत्वनिश्चयात् इह तु नपुंसकलिङ्गस्यान्यत्राप्रवृत्तिरुपपादितैव । किं च तत्र पुंस्पशूनामपि सन्निधानात्तेषु चरितार्थस्यास्मैपदस्य सारस्वत्यामप्रवृत्तिर्युक्ता इह तु यत्पदस्य क्व चरितार्थताऽस्तु निर्देक्ष्यमाणेषु द्यावापृथिव्यादिष्वपि लिङ्गवैगुण्यमविशिष्टं अधिकं तु वचनवैगुण्यं यद्यपि तदादिनिर्देक्ष्यमाणविशेषानवगमात् तद्वैगुण्यं न प्रतिसन्धीयते त-

(१) विधिसंस्पर्श इति पु० पा० ।

थापि द्यावापृथिव्यादिनिर्देशानन्तरं तद्वैगुण्यप्रतिसन्धानमवर्जनीयमिति तदा तत्र लिङ्गवचनयोरुभयोरपि कथं चिदुपपादनमन्वेषणीयं तदिहैव लिङ्गमात्रस्योपपादनमन्विष्यताम् ।

यद्वा दहराकाशे परमात्मनि यदन्तर्वर्तते तदन्वेष्टव्यमिति वक्ष्यमाणानां द्यावापृथिव्यादिनां सामान्येनोपासनाविधिः एवं च तस्मिन्नित्यस्य न व्यवहितपरामर्शित्वं न च नपुंसकलिङ्गानुपपत्तिः नापि तस्मिन्यदन्तरिति पुनरनुकीर्तनं व्यर्थमिति शङ्कावकाशः, किं तदत्र विद्यत इति पूर्ववदेव तदन्तर्वर्त्यसम्भवेनाक्षेपे यावान्वा अयमित्यादिना दहराकाशवैभववर्णनापूर्वकं तत्र द्यावापृथिव्यादीनां पित्रादिब्रह्मलोकान्तानां च सत्यकामशब्दितानां तदन्तर्वर्त्तितयोपास्यानामुपन्यासः तस्य दहराकाशस्योपासनाविधिस्तु तदन्तर्गतोपासनाविधिनैवार्थसिद्धः पृष्टसामगतः(१) सर्वताविधानेनेव पृष्टसामविधिः न हि दहाराकाशमनुपासीनेन तदन्तर्वर्त्तितया द्यावापृथिव्यादिकमुपासितुं शक्यं एवमर्थसिद्धं दहराकाशस्योपासनं श्रुतं तत्समाहितोपासनं च अथ य इहात्मानमित्यादिफलवाक्ये अनुकीर्तितं इति न कस्याप्यसाङ्गत्यम् । अथ वा तस्मिन्यदन्तस्तत्साधारमन्वेष्टव्यमित्यध्याहारोस्तु अग्निमानुरोधात् न ह्येतावतोपसंहारेणात्रोपक्रमस्य प्रतीतार्थपरित्यागरूपं अन्यथाकरणं तत्प्रतीतदहराकाशान्तर्वर्त्युपास्यत्वापरित्यागेनैवोपसंहारसमर्पितदहरोपास्यत्वलक्षणाधिकावापमात्रकरणात् । केचित्तु फलवाक्ये दहराकाशस्य धर्मिणस्तद्धर्माणां च पृथगुपासनानुवादमनुरुन्धानास्तस्मिन्यदन्तरित्युपक्रमे यो दहराकाश इत्यध्याहृत्य यो दहराकाशो यच्च तदन्तर्वर्ति गुणजातं तदुभयमुपासनीयमिति वाक्यार्थं वर्णयन्ति तदर्थं च तत्पदे 'त्यदादीनि सर्वैर्नित्यं' 'नपुंसकमनपुंसके नैकवच्चास्यान्यतरस्यामिति' व्याकरणसूत्रानुरोधेन नपुंसकशेषैकवद्भावावङ्गीकृत्योभयपरामर्शित्वमुपपादयन्ति सर्वेष्येते पक्षाः प्रपञ्चेन न्यायरक्षामणावस्माभिरुपपादयिष्यन्ते तस्मात्सिद्धमेतत् दहराधिकरणे नोपसंहारप्राबल्योपजीवनमस्ति न वा सूत्रकारमतिप्राप्तं उत्तरत्र्य इति बहुवचनेन बह्वनुग्रहन्यायस्यैव सूचनादिति । न-

(१) गतसर्वता इति पु० पा० ।

म्बाकाशस्तल्लिङ्गादित्यधिकरणे लिङ्गबलेनाकाशश्रुतेरन्यथानयनं कृतमिति तावदविवादं तत्र स्वतः श्रुतेर्दुर्बलस्य लिङ्गस्य 'दुर्बलस्य प्रमाणस्य बलवानाश्रयो यदा । तदापि विपरीतत्वं शिष्टाकोपे यथोदित'मिति न्यायेन बलवदुपष्टम्भकृतमेव बलवत्वं वाच्यं तत्र न तावल्लिङ्गस्योपक्रमगतत्वं प्राबल्ये हेतुः उपक्रमे ब्रह्मलिङ्गादर्शनात् । न चा'स्य लोकस्य का गतिराकाश इतिहोवाच सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्त आकाशं प्रत्यस्तं यन्त्याकाशोह्येभ्यो ज्यायानाकाशः परायणं स एष परोवरीयानुद्गीथः स एषोऽनन्त' इति विषयवाक्ये प्रश्नस्थं सर्वलोकगतित्वं उपक्रमगतं लिङ्गमिति शङ्कनीयं, प्रश्नस्या'मुष्य लोकस्य का गतिरित्ययं लोक इति होवाचेति' प्रस्तुत पृथिवीलोकगतिमात्रविषयत्वेन सर्वलोकगतिविषयत्वासिद्धेः । नचास्य प्रश्नस्य पृथिवीमात्रविषयत्वे 'अद्भ्यः पृथिवीति' श्रुत्यन्तरे तत्कारणत्वेन प्रसिद्धानामपामेव गतित्वेन वक्तव्यतया आकाश इति होवाचेत्युत्तरासाङ्गत्यमिति वाच्यम् । पृथिवीं प्रत्यपां साक्षात्कारणत्वेपि परम्परया आकाशस्यापि कारणकोटिनिविष्टत्वेन सामगतिपरंपरायामप्रकारणत्वेन पूर्वं गृहीता अपो विहायाकाशो गतित्वेनोक्त इत्युपक्रमप्राबल्यवादे तदनुरोधेन तत्साङ्गत्यवर्णनोपपत्तेः पूर्वग्रन्थे 'का साम्नोगतिरिति स्वर इति होवाच स्वरस्य का गतिरिति प्राण इति होवाच प्राणस्य का गतिरिति अन्नमिति होवाच अन्नस्य का गतिरिति आप इति होवाच अपां का गतिरिति असौ लोक इतिहोवाच इति' शालावत्यदाल्भ्यप्रश्नप्रतिवचनपरम्परायामन्नगतित्वेनापां गृहीतत्वात् नाप्युपसंहारग(१)त्वेपि भूयस्त्वं प्राबल्ये हेतुः उपासनापरेपि वाक्ये गतिविषयप्रश्नप्रतिवचनदर्शनादवान्तरतात्पर्येणाकाशस्य सामगतिपरम्पराविश्रान्तिभूमित्वेन प्रतिपाद्यत्वावगत्या प्रधानविरोधिनां भूयसामप्यनादरणीयत्वात् प्रधानश्रुत्यनुसारेण सर्वकारणत्वसर्वलयस्थानत्वसर्वतोज्यायस्त्वपरायणत्वपरोवरीयस्त्वानन्तत्वलिङ्गानामेव भूयसामप्यन्यथानयनस्यौचितत्वात् सूत्रे तल्लिङ्गादित्येकवचनस्वारस्येन भूयस्त्वापेक्षेण केन चिदेव लिङ्गेन श्रुतेरन्यथा-

---

(१) नाप्युपसंहारगतत्वेति ख० पु० पा० ।

नयनं विवक्षितमिति प्रतीतेश्च । नचोपसंहारगतत्वेपि सर्वकारणत्वादेरनन्यथासिद्धत्वं प्राबल्ये हेतुः 'आकाशाद्वायुरिति' श्रुत्यन्तरसिद्धभूताकाशगतवाय्वादीतरसर्वभूतकारणत्वाभिप्रायेण सर्वकारणत्वव्यपदेशः अग्रिमसन्दर्भोपि वाय्वादीतरभूतलयस्थानत्वतदपेक्षज्यायस्त्वादिविषयः इति सर्वेषामन्यथा नेतुं शक्यत्वात् । न चाकाशादेव समुत्पद्यन्ते इति सावधारणं कारणत्वं भूताकाशे न सम्भवति तस्य तेजःप्रभृतिकारणत्वे वाय्वादिकारणान्तरसापेक्षत्वादिति शङ्कनीयं ब्रह्मणोपि 'वैषम्यनैर्घृण्ये न सापेक्षत्वादिति' न्यायेन जगत्सृष्टौ कालादृष्टादिसापेक्षत्वेन साम्यात् कथञ्चिदवधारणसमर्थनस्य भूताकाशेपि सम्भवात् तस्मात्प्रकारान्तरासम्भवादुपसंहारगतत्वमेव लिङ्गस्य प्राबल्यहेतुरिति सिद्धमुपसंहारप्राबल्यापेक्षणम् ।

अत्रोच्यते । उपक्रमावगततया उक्रमोपसंहारैकरूप्यावगततया अन्यथासिद्धतया च प्रबलेनानन्तत्वेन लिङ्गेन तत्राकाशश्रुतेरन्यथानयनं तथाहि उपक्रमे पृथिवीलोकं सामगतिपरम्पराविश्रान्तिभूमित्वेन समर्थितवतः शालावत्यस्य पक्षे 'अन्तवद्वै किल ते शालावत्य सामेति' जैवलिना अन्तवत्वदोष उद्भावितः तेन उपक्रम एवैतदवगतं स्वयं जैवलिरनन्तमन्यत्सामगतिपरम्परापर्यवसानभूमित्वेन विवक्षतीति तदेकरूपश्चोपसंहारः अस्य लोकस्य का गतिरिति शालावत्यपृष्टेन जैवलिना आकाशं गतित्वेनोक्त्वा स एषोनन्त इति तत्रानन्तत्वस्योपसंहृतत्वात् अनन्यथासिद्धत्वञ्चानन्तत्वलिङ्गं अनन्तवत्येव भूताकाशे वाय्वादिस्वकार्यापेक्षयाऽधिककालावस्थायित्वाभिप्रायेणानन्तत्वव्यपदेश इति त्रिदशामरत्वन्यायेन तदनन्यथानयन उपक्रमसङ्कीर्तितान्तवत्त्वदोषपरिहारालाभात् ततश्च यथा 'जामि वा एतद्यज्ञस्य क्रियते यदन्वञ्चौ पुरोडाशौ उपांशु याजमन्तरा यजति विष्णुरुपांशु यष्टव्योऽजामित्वाय प्रजापतिरुपांशु यष्टव्यो ऽजामित्वाय अग्नीषोमौ उपांशु यष्टव्यावजामित्वायेति' वाक्ये उपक्रमे पुरोडाशयागद्वयनैरन्तर्येण जामितादोषसङ्कीर्तनेन तत्परिहाराय तयोर्मध्ये किञ्चिद्विधित्सितमित्यवगमात् अजामित्वायेति तद्दोषपरिहारोपसंहारैकरूपात् विष्ण्वादिवाक्येषु यागविधिस्वीकारे तद्दोषपरिहारलाभा-

ञ तद्दोषपरिहारायान्तरावाक्य एव कल्प्योपि यागविधिः स्वीकर्तव्य इति जामिनादोषपरिहारानुसारेण विष्ण्वादिवाक्येषु प्रत्यक्षाया अपि श्रुतेरन्यथानयनं तत्वानुसारेणाकाशश्रुतेरिति ।

नन्वेवं स्वर्गलोकं सामगतिपरम्परापर्यवसानभूमित्वेन समर्थितवतोद्दालकस्य पक्षे शालावत्यकृतेन 'अप्रतिष्ठितं वै किल दालक्य सामे'त्यप्रतिष्ठितत्वदोषोद्भावनेन शालावत्यः स्वयं प्रतिष्ठारूपं किञ्चित्तत्वेन विवक्षतीत्यनुमानात्तदनन्तरमयं लोक इति होवाचेति शालावत्यवचनमपि ब्रह्मविषयं स्यात् ब्रह्मण एवासङ्कुचितसर्वप्रतिष्ठारूपत्वात् 'ब्रह्मपुच्छं प्रतिष्ठेति' श्रवणाच्च। मैवम्। तदनन्तरं तदब्रह्मत्वगमकान्तवत्वश्रवणात्तदूर्ध्वान्तरप्रपञ्चानुसारेण च तस्य प्रतिष्ठालोकत्वप्रसिद्धेः पृथिवीलोक एव विश्रान्तेः भूयोनुग्रहन्यायात् 'इतः प्रदानं देवा उपजीवन्ति' इति श्रुत्यन्तरानुसारेण ' अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते । आदित्याज्जायते वृष्टिः वृष्टेरन्नं ततः प्रजा इति' स्मृत्यनुसारेण पृथिवीलोकस्य स्वर्गलोकगतित्वौचित्याच्च । नचाकाशस्यानन्तत्वकीर्तनानन्तरं तद्विरुद्धश्रवणमण्वप्यस्ति वा न वा भूताकाशस्य पृथिवीलोकगतित्वौचित्यमस्ति पृथिवीं तदूर्ध्वं तदूर्ध्वं प्राणिनिकायं वा प्रति विशिष्य भूताकाशस्योपजीव्यत्वप्रसिध्यभावात् सामादीन्प्रति तथोपजीव्यत्वेन लोकतः श्रुतितो वा प्रसिद्धानामेव स्वरादीनां सामगतित्वस्य पूर्वग्रन्थे वर्णनात् तर्हि पृथिवीलोकं प्रतिब्रह्मणोपि विशिष्य गतित्वप्रसिद्धिर्नास्तीति तस्यापि पृथिवीलोकगतित्ववचनं समञ्जसं न स्यादिति चेत् । सत्यम् । नास्माभिरस्य लोकस्येति शालावत्यप्रश्नः पृथिवीलोकगतिविषय इत्युपेयते किं तु सर्वलोकगतिविषय इति पृथिवीलोकमात्रगतिविषयत्वे प्रत्यक्षादिसन्निधापितसमस्तपरामर्शशक्तयोरस्य लोकस्येति श्रुत्योः पृथिवीलोकसन्निधानेन सङ्कोचकल्पनापत्तेः सर्वाणिह वा इमानि भूतानि इत्याद्यग्रिमप्रपञ्चस्यासामञ्जस्यापत्तेश्च आकाशस्य सर्वलोकगतित्वोक्तौ हि तदुपादनार्थं अग्रिमप्रपञ्चः सङ्गच्छते सर्वभूतोत्पत्तिलयस्थानत्वात् सर्वलोकं प्रति गतित्वमुपजीव्यत्वरूपमुपपन्नमिति पृथिवीमात्रगतित्वोक्तौ तावन्न वक्तव्यं स्यात् । ननु स्वर्गलोकं प्रति पृथिवीलोकस्य गतित्वे उक्ते पृथिवीलोकं प्रत्येव गतौ प्रष्टव्यायां सर्वलोकगतिप्रश्नस्य कथं सङ्गतिरिति चेत् इत्थं अन्तव-

द्वै किल त इति अन्तवत्त्वदोषोद्भावनेन स्वयमनन्तं जैवलिर्गतित्वेन विवक्षतीति तावदवगतं अनन्तं च देशतः कालतो वस्तुतश्च परिच्छेदरहितं वस्तुतः पदच्छेदराहित्यं च सर्वोपादानतया सर्वात्मकस्यैव सम्भवति तच्च ,सर्वलोकगतिरूपमिति निश्चित्य तत्किं सर्वलोकगतिरूपमनन्तं वस्त्विति प्रश्न इति एवं सर्वलोकगतौ पृष्टायां तथात्वेन 'यतो वा इमानि भूतानि जायन्ते' 'कोह्येवान्यात्कः प्राण्याद्'त्यादिश्रुत्यन्तरे ब्रह्म प्रसिद्धमिति तस्य गतित्वबचनं युज्यते अतएवानन्तरग्रन्थे सर्वाणि हवा इति हवै शब्देन सैव प्रसिद्धिर्द्योत्यते एवं चोपक्रमगतसर्वलोकगतित्वलिङ्गेनाप्याकाशश्रुतेरन्यथानयनमविकलं तथा भूयोनुग्रहन्यायेनाप्याकाशे सर्वलोकगतिसम्बन्धस्यैवावान्तरतात्पर्येणापि प्रतिपाद्यतया आकाशस्य स्वरूपतः प्रतिपाद्यत्वरूपप्राधान्यासिद्धेः । नन्वाकाशश्रुतिरपि पञ्चषवारमभ्यस्तेति भूयोऽनुग्रहन्याय उभयत्रापि तुल्य इति चेन्न। सर्वलोकगतित्वादीनामनन्तत्वपर्यन्तानां लिङ्गानां तदपेक्षया भूयस्त्वात् लिङ्गानुग्रहेपि श्रुतीनामपि कासां चिदनुग्रहलाभेन श्रुतिसाहित्येन भूयस्तरत्वाच्च लिङ्गान्यथाकरणे हि भूतश्रुतेराकाशसाधारणायाः सर्वश्रुतेश्च तत्साधारणसामस्त्यवाचिकाया आकाशव्यतिरिक्तेषु सङ्कोचरूपोबाधः कल्पनीयः स एषोनन्त इत्यत्र निषेध्यसमर्पकस्यान्तशब्दस्य चाल्पकालावस्थायित्वे लक्षणा कल्पनीया आकाशादेवेत्यवधारणश्रुतेश्चात्यन्तबाधः कल्पनीयः अवधारणश्रुतिर्हि उपात्तसजातीयं व्यवच्छिनत्ति अतएव गृहमधीये परिक्रय्यापक्षे आज्यभागौ यजतीत्यस्यावधारणार्थलक्षकस्याज्यभागसजातीययागान्तरव्यवच्छेदकत्वं स्विष्टकृद्विधानस्येवावधारणार्थलक्षकस्य शेषकार्यान्तरव्यवच्छेदकत्वं च पूर्वतन्त्रे *स्विष्टकृदिति भक्षप्रतिषेधः स्या*दित्यधिकरणे दर्शितं एवञ्चाकाशशब्दस्य मूलकारणब्रह्मपरत्वे भूतेषु तादृशकारणान्तराभावात्सङ्कुतावधारणश्रुतिरवान्तरकारणभूताकाशपरत्वे तु तेजः प्रभृतिषु वाय्वादीनामपि तादृशकारणानां सत्त्वेन तद्व्यवच्छेदासम्भवादसङ्कुताऽवधारणश्रुतिःस्यात् नहिपूर्वतन्त्रे श्रुत्या मन्त्रलिङ्गबाधे श्रुतिकल्पनामात्रबाधवदिह श्रुत्युपस्थाप्यब्रह्मलिङ्गबाधे श्रुतिकल्पनामात्रबाधः किन्तु तत्तल्लिङ्गोपस्थापककोट्यन्तर्गतकल्पश्रुतिबाधोप्यवर्जनीयः एवञ्च भूयसीनां ब्रह्म-

लिङ्गश्रुतीनामनुग्रहायाकाशश्रुतिरन्यथा नेयेत्यपि युक्तमेव तस्मादाकाशाधिकरणेपि नोपसंहारप्राबल्योपजीवनशङ्कावकाशः एवमन्यत्रापि तत्र तत्र सम्भावितानां शङ्काशूकानां निरसनमूहनीयं तस्मादुत्तरमीमांसायामप्युपक्रमप्राबल्यमविवादितं एवं च सकलमीमांसकव्यवहारविरुद्धोनयसरणिगन्धानभिज्ञैरर्वाचीनैः स्वमतस्येतरमतवैलक्षण्यप्रकटनाय कल्पितोपक्रमोपसंहारबलाबलव्यत्ययो यवनगुरूपदिष्टशौचमुखप्रक्षालनपौर्वापर्यव्यत्यासवदुपेक्षणीयः प्रामाणिकैरिति सिद्धम् ।

विद्वद्गुरोर्विहितविश्वजिदध्वरस्य
श्रीसर्वतोमुखमहाव्रतयाजिसूनोः ॥
श्रीरङ्गराजमखिनः श्रितचन्द्रमौलि-
रस्त्यप्पदीक्षित इति प्रथितस्तनूजः ॥
अकरोदयमक्लिष्टमात्मबुद्धिविशुद्धये ।
उपसंहृतदुर्न्यायमुपक्रमपराक्रमम् ॥

इति श्रीमद्भरद्वाजकुलजलधिकौस्तुभ श्रीमद्द्वैतविद्याचार्य श्रीरङ्गराजाध्वरिवरसूनोरप्पय्यदीक्षितस्य कृतिरुपक्रमपराक्रमः सम्पूर्णः ।

॥ श्रीहरिर्जयति ॥